CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५. प्राप्तेन स्व-भुजार्ज्जितञ्च सुचिरञ्चैकाधिराज्यं क्षितौ चन्द्राह्वेन समग्र-चन्द्र-सदृशीं वक्त्र-श्रियं बिभ्रता [।*]

६. तेनायं प्रणिधाय[१] भूमि-पतिना भावेन[२] विष्णो[३] मतिं प्रान्शुर्व्विष्णु[४]-पदे गिरौ भगवतो विष्णोर्ध्वजः स्थापितः [।।*]३

---

१. 'ध' के बाद डा जैसा एक अक्षर उत्कीर्ण है जो अनावश्यक है।

२. प्रिंसेप तथा फ्लीट ने धावेन पढ़ा। 'भ' की बाएं ओर की तिरछी रेखा दाएं ओर की सीधी रेखा में मिल गई है। 'भ' पर शिरोरेखा लगी है जबकि 'ध' पर यह नहीं लगती।

३. विष्णौ पढ़ें।

४. प्रांशु° पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारगुप्त (प्रथम)-कालीन बिलसड स्तम्भ अभिलेख

गुप्त संवत् ९६

स्थान : उत्तर-प्रदेश के एटा जिले में बिलसड ग्राम।

लिपि : उत्तरी ब्राह्मी, किन्तु इस वर्ग के अन्य अभिलेखों की अपेक्षा इसमें मात्राएं अधिक लम्बी हैं।

भाषा : संस्कृत, कहीं-कहीं प्राकृत से प्रभावित।

विषय : स्वामी-महासेन (स्कन्द-कार्तिकेय) के मन्दिर में ध्रुव शर्मा नामक व्यक्ति द्वारा प्रतोली एवं धर्म-सत्र बनवाने तथा इस (अभिलेख वाले) स्तम्भ को स्थापित कराने का वर्णन।

संदर्भ : कनिंघम, ASI, II, p. 19; फ्लीट, CII, III, No. 10; सरकार, SI, p. 285.

१. [सिद्धम् ।।] [सर्व्व-राजोच्छेत्तु: पृथिव्यामप्रतिरथस्य चतुरुद]धि-सलिलास्वादित-यशसो

२. [धनद-वरुणेन्द्रान्तक-समस्य कृतान्त-परशोः न्यायागतानेक-गो-हि]रण्य-कोटि-प्रदस्य चिरोत्सन्नाश्वमेधाहर्त्तुः

३. [महाराज-श्री-गुप्त-प्रपौत्रस्य महाराज-श्री-घटोत्कच-पौत्रस्य म]हाराजाधिराज-श्री-चन्द्रगुप्त-पुत्रस्य

४. लिच्छवि-दौहि[त्रस्य महादेव्यां कुमारदेव्यामुत्पन्नस्य महारा]-जाधिराज-श्री-समुद्रगुप्त[स्य*][1] पुत्रस्य

५. महादेव्यां दत्तदेव्यामुत्पन्नस्य स्वय[मप्रतिरथस्य परम]-भागवतस्य महाराजाधिराज-श्री-चन्द्रगुप्त[स्य*] पुत्रस्य

---

१. प्रथम चार पंक्तियों में नष्ट हुए अंशों का पाठ समुद्रगुप्त के इलाहाबाद स्तम्भ अभिलेख तथा स्कन्दगुप्त के भिटारी स्तम्भ अभिलेख के आधार पर अनुमानित किया गया है।

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. महादेव्यां ध्रुवदेव्यामुत्पन्नस्य महाराजाधिराज-श्री-कुमार-गुप्तस्याभिवर्द्धमान-विजय-राज्य (ज्ये) संवत्सरे षण्णवते[1] [।*]

७. अस्यान्दिवस-पूर्व्वायां[2] भगवतस्त्रैलोक्य-तेजस्संभार-संभूताद्भुत[3]-मूर्त्तेर्ब्रह्मण्य-देवस्य

८. ………… निवासिनः स्वामि-महासेनस्यायतने[ऽ*]स्मिन्कार्त्त-युगाचार-सद्धर्म्म-वर्त्मानुयायिना

९. [मा]ता[4]……… [प]र्षदा मानितेन ध्रुवशर्म्मणा कर्म्म महत्कृते (त) [मि*]दम् ।

१०. कृ[त्व]ा [नेत्रा][5]भिरामां मुनिवसति-[मिह][6] स्वर्ग्ग-सोपान-[रू]पाम् ।[7] कौबेर-च्छन्द-बिम्बां स्फटिक-मणि-दलाभास-गौरां-(रीं) प्रतोलीम् ।

११. प्रासादाग्राभिरूपं गुण-वर-भवनं [धर्म्म-स]त्त्रं यथावत् ।[8] पुण्येष्वेवाभिरामं व्रजति शुभ-मतिस्तात-शर्म्मा ध्रुवो[ऽ*]स्तु । (॥)

१२. [--]ा[--]ा [--]स्य [⏑—]शुभामृत-वर-प्रख्यात-लब्धा भुवि ।[9] [--̀] [--̀] भक्तिरहीन-सत्व (त्त्व)-समता कस्तं न संपूजयेत् ।

१३. येनापूर्व्व-विभूति-सञ्चय-चयैः शैली [⏑ ⏑—] : ।[10] तेनायं ध्रुवशर्म्मणा स्थिर-वरस्स्तंभो[च्छ्र]यः कारितः । (॥) २

---

१. सरकार का संशोधन : षण्णवतितमे ।

२. फ्लीट यहां से आगे तिथी जोड़ते हैं जिसकी आवश्यकता नहीं है । 'पूर्व्वा' तिथि के अर्थ में प्रयुक्त है ।

३. फ्लीट : संतत॰ ।

४. सरकार का अनुमान : मातापित्रोरात्मनश्च पुण्यार्थं साधु-पर्षदा ।

५-६. सरकार का अनुमान ।

७ से १०. चारों स्थानों पर अर्धविराम की पड़ी रेखा अनावश्यक है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारगुप्त (प्रथम)-कालीन उदयगिरि गुहा अभिलेख

गुप्त संवत् १०६

स्थान : मध्य-प्रदेश में विदिशा के निकट उदयगिरि के एक गुहा-मन्दिर की भीतरी भित्ति पर उत्कीर्ण ।

लिपि : उत्तरी ब्राह्मी ।

भाषा : संस्कृत ।

विषय : शंकर नामक यति द्वारा जैन तीर्थङ्कर पार्श्व (पार्श्वनाथ) की प्रतिमा की स्थापना ।

संदर्भ : कनिंघम, ASI, 10, p. 53; हुल्श, IA, II, p. 309; फ्लीट, CII, III, No. 61.

१. नमः सिद्धेभ्यः [।।*] श्री-संयुतानां गुण-तोयधीनां गुप्तान्वयानां नृप-सत्तमानां

२. राज्ये कुलस्याभिविवर्द्धमाने षड्भिर्य्युते वर्ष-शते[ऽ*]थ मासे [।।१।।*] सु-कार्त्तिके बहुल-दिने[ऽ*]थ पंचमे

३. गुहा-मुखे स्फट[1]-विकटोत्कटामिमां [।*] जित-द्विषो जिन-वर-पार्श्व-संज्ञिकां जिनाकृतिं शम-दमवान-

४. चीकरत् [।।२।।*] आचार्य्य-भद्रान्वय-भूषणस्य शिष्यो ह्यसा-वार्य्य-कुलोद्गतस्य [।*] आचार्य्य-गोश-

५. र्म्म-मुनेस्सुतस्तु पद्मावतावश्वपतेर्भटस्य[2] [।।३।।*] परैरजेयस्य रिपुघ्न-मानिनस्स सङ्घि-

---

१. हुल्श : स्फुट ।

२. यहां 'पद्मावतौ' रूप पद्मावति का सप्तमी एकवचन है । शुद्ध शब्द पद्मावती का सप्तमी एकवचन रूप पद्मावत्याम् होता है । यहां छन्द की आवश्यकता के कारण पद्मावति शब्द ग्रहण किया गया है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. लस्येत्यभिविश्रुतो भुवि [।*] स्व-संज्ञया शङ्कर-नाम-शब्दितो विधान-युक्तं यति-मा-

७. र्ग्गमास्थितः[।।४।।*]स उत्तराणां सदृशे कुरूणां उदग्दिशा-देश-वरे प्रसूतः[।*]

८. क्षयाय कर्म्मारि-गणस्य धीमान् यदत्र पुण्यं तदपासंसर्ज्ज [।।५।।*]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(।७)

कुमारगुप्त (प्रथम)-कालीन करमदाण्डा अभिलेख

गुप्त संवत् ११७

स्थान : उत्तर प्रदेश के फैजाबाद जिले में करमदाण्डा ग्राम के निकट भराढी ढीह् नामक प्राचीन स्थल के उत्खनन से प्राप्त शिव लिङ्ग पर उत्कीर्ण।

लिपि : गुप्त ब्राह्मी का पश्चिमी रूप।

भाषा : संस्कृत।

विषय : चन्द्रगुप्त (द्वितीय) के मन्त्री कुमारामात्य शिखरस्वामी के पुत्र पृथ्वीषेण द्वारा दान का उल्लेख।

संदर्भ : स्टेनकोनो, EI, 10, pp. 70 ff; सरकार, SI, p. 289.

१. नमो महादेवाय। मह[ाराजा]धिराज-[श्री-चन्द्रगुप्त-पादा]-

२. नुध्यातस्य चतुधुदधि[1]-सलिलास्वादित-य[शसो महाराजा]-

३. धिराज-श्री-कुमारगुप्तस्य विजय-राज्य-संवत्सर-शते सप्तदशो-[त्तरे]

४. कार्त्तिक-मास-दशम-दिवसे [ऽ*]स्यान्दिवस-पूर्व्वायां छन्दोग्या-चार्य्य[ाश्व]-वाजि-

५. सगोत्र-कुरमर[व्य ?] भट्टस्य पुत्रो विष्णुपालितभट्टस्तस्य पुत्रो[2] महार[ा]-

६. ज[ा*]धिजाजा (राज) -श्री-चन्द्रगुप्तस्य मन्त्री कुमारामात्य-शिखर-स्वाम्यभूत्तस्य पुत्रः

७. पृथिवीषेणो महाराजाधिराज-श्री-कुमारगुप्तस्य मन्त्री कुमारामात्यो[ऽ*]न-

---

१. चतुरुदधि पढ़ें।

२. पूत्रो उत्कीर्णं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

८. न्तरं च महाबलाधिकृतः(तो) भगवतो महादेवस्य पृथिवीश्वर इत्येवं समाख्यातस्या-

९. स्यैव भगवतो यथा-कर्त्तव्य-धार्म्मिक-कर्म्मणा पाद-शुश्रूषणाय भगवच्छै-

१०. लेश्वर-स्वामि-महादेव-पाद-मूले ग्रायोध्यक-नाना-गोत्र-चरण-तपः–

११. स्वाध्याय-म[न्त्र]-सूत्र-भा[ष्य-प्रवचन] -पारग-[भारडिद?]-समद-देव-द्रोण्यां

१२. ....

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारगुप्त (प्रथम) का दामोदरपुर ताम्र-पट्ट अभिलेख

गुप्त संवत् १२४

स्थान : बङ्गलादेश के दीनाजपुर जिले में दामोदरपुर नगर से प्राप्त ताम्र-पट्ट पर उत्कीर्ण। यह स्थान पुण्ड्रवर्द्धन भुक्ति के अन्तर्गत था।

लिपि : उत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : पुण्ड्रवर्द्धन भुक्ति में अग्निहोत्र के प्रवर्तन के लिए भूमिदान।

संदर्भ : राधागोविन्द बसाक, EI, 15, p. 130; सरकार, SI, p 290.

(प्रथम ओर)

१. सम्ब (संव) [त्सरे*] १०० २ ४ फाल्गुण (न)-दि[1] ७ परमदैवत-परमभट्टारक-महाराज[ा*]-

२. धिराज-श्री-कुमारगुप्ते पृथिवी-पतौ तत्पाद-परिगृहीते पुण्ड्र-वर्द्ध[न*]-

३. भुक्तौ दु(उ)परिक[2]-चिरातदत्तेनानुवहवा(मा)नक-कोटिवर्ष-विषये च त-

४. न्नियुक्तक-कुमारामात्य-वेत्रवर्मन्य(ण्य)धिष्ठाणा(ना)धिकरणञ्च नगर-श्रेष्ठि-

५. धृतिपाल-सार्त्थवाह-व(ब)न्धुमित्र-प्रथम-कुलिक-धृतिमित्र-प्रथम-का[य]-

६. स्थ-शाम्बपाल-पुरोगे संव्यवहरति यतः ब्राह्मण-कर्प्पटिकेन[3]

७. विज्ञापित[म्*] अरर्हथ(अर्हथ) ममाग्निहोत्रोपयोगाय अप्रदा-[ऽ*]प्रहत-खि-

---

१. दिवस का संक्षेप।

२. बसाक : भुक्तादुप°।

३. बसाक : °केण।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

८. ल-क्षेत्र(त्रं) त्र(त्रै)दीनारिक्य-कुल्यवापेण(न) शश्वता (दा)चंद्रार्क्क-तारक-भोज्ये(ग्य) [त*]-

(दूसरी ओर)

९. या-नीवी-धर्म्मेण दातुमिति एवं दीयतामित्युत्पन्ने त्रिनी (त्रीणि) दीना[राण्यु*]-

१०. पसंगृह्य यतः पुस्तपाल-रिशि(ऋषि)दत्त[1]-जयनन्दि-विभुदत्ताना-मवधा-

११. रणया डोङ्गाया उत्तर-पश्चिमोद्देशे[2] कुल्यवापमेकम्(कं) दत्तम्[।।*]

१२. स्व-दत्तां पर-दत्ताम्बा (दत्तां वा) यो हरेत वसुन्धरां(राम्) [।*] भूमि-[दान]-संबद्धा[:*] श्लोका भवन्ति[3] [।*]

१३. स विष्ठायां क्रि(कृ)मिर्भूत्वा पित्रि(तृ)भि[:*] सह पच्यते [इ*]ति [।।१।।*]

---

१. 'पालर्षिदत्त पढ़ें ।

२. बसाक : 'पश्चिणद्देशे ।

३. भूमि-दान-संबद्धः श्लोको भवति पढ़ें। यह वाक्य स्वदत्तां···से पहले होना चाहिए था ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारगुप्त (प्रथम) का दामोदरपुर ताम्र-पट्ट अभिलेख

गुप्त संवत् १२८

स्थान : बङ्गलादेश के दीनाजपुर जिले में दामोदरपुर नगर से प्राप्त ताम्र-पट्ट पर उत्कीर्ण । यह स्थान पुण्ड्रवर्धन भुक्ति के अन्तर्गत था ।

लिपि : उत्तरी ब्राह्मी ।

भाषा : संस्कृत ।

विषय : पुण्ड्रवर्धन भुक्ति में पञ्चमहायज्ञ के प्रवर्तन के लिये भूमिदान ।

सन्दर्भ : राधागोविन्द बसाक, El, 15, p. 133; के०एन० दीक्षित, El, 17, p. 193; सरकार, Sl, p. 292.

(प्रथम ओर)

१. स[सं] १०० २० ८ वैशाख-दि १० ३ पर[मदैव]त-परम-भट्टारक-महाराजाधिराज-[श्री]-[कुमा*]-

२. रगुप्ते पृथिवी-पतौ [तत्पाद]-परिगृहीतस्य पु[ण्ड्र]वर्द्धन-भुक्ता-वुप-[रिक-चि]रातदत्त[स्य]

३. भोगेना[नुव]ह[मानक]-कोटिव[र्षं]-विषये तन्नियुक्तक-कु[मा]रा-मात्य-वे[त्र]-

४. वर्म्मणि[1] अधिष्ठाना[धिकर[णञ्च] नगर-[श्रे]ष्ठि-धृतिपाल-सार्थवा[ह-बन्धुमि]त्र[2]-प्र[थ]-

५. म-कुलिक-धृतिमित्र-[प्रथ]म-कायस्थ-शाम्ब]पाल-पुरो[गे] सम्व्य-(संव्य)व[हर]ति [यतः*]स……[3]

---

१. यहां यण् सन्धि नहीं की गई है ।

२. ब के स्थान पर व उत्कीर्ण है ।

३. बसाक के अनुसार यहां क्रय-कर्ता का नाम रहा होगा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. विज्ञापितं (तम्) अ[र्हं]थ मम प[ञ्च]-महायज्ञ-प्रवर्त्तनाय।-
नुवृत्ता-प्रदाक्षय-नि (नी) [वी*]-

७. मर्य्यादया दातुमिति एतद्वि ज्ञाप्यमुपलभ्य पुस्तपा[ल]-रिसिदत्त[१]-
जयन[न्दि-विभुदत्तानामव]-

८. धारणया दीयतामित्यु[त्प]न्ने एतस्माद्य[था]नुवृत्त-त्रैदी-
नारि[क्य-कु]ल्यावापे[न]

(दूसरी ओर)

९. [द्व]यमुप[संगृ]ह्य[२] [ऐरा]वता[गो]-राज्ये पश्चिण (म) -दिशि
पञ्च-द्रो[णा]-

१०. [तम]का: [भूमय:*][३]ह[ट्ट][४]-पानकैश्च सहितेति (सहिता इति)
दत्ता: [।*] तदुत्तर-कालं सम्व्य (संव्य) वहारिभि: [धर्म्मम-
वेक्ष्या]नु[म]-

११. न्तव्या: [।*] अपि च भूमि-दान-सम्व (संब) द्धामि (वि) मौ
श्लोकौ भवत: [।*] पूर्व-दत्तां द्विजाति[भ्यो]

१२. यत्नाद्रक्ष युधिष्ठिर [।*] महीं महीव (म) तां श्रेष्ठ दानाच्छ्रेयो
[ऽ*]नुपा[ल*]नं[५][॥१॥*] बहुभिर्व्वसुधा[६] दत्ता दी[य]ते च

१३. पुन: पुन: [।*] यस्य यस्य यदा भूमिस्तस्य तस्य तदा फल-
मिति[७][॥२॥*]

---

१. 'ऋ' का 'रि' में परिवर्तन द्रष्टव्य। शुद्धरूप 'पुस्तपालर्षिदत्त' है।

२. दीनारद्वयम् से अभिप्राय है।

३. सरकार 'भूखण्डा:' सुझाते हैं।

४. थॉमस : 'अरहट्ट'।

५. °नम् पढ़ें

६. बहु° पढ़ें

७. फलम् [॥२*]इति[॥*] पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(in)-

स्कन्दगुप्त का गिरनार अभिलेख

गुप्त संवत् १३६, १३७, १३८

स्थान : गुजरात के जूनागढ़ नगर से लगभग दो किलो मीटर पूर्व की ओर गिरनार पर्वत की एक शिला पर उत्कीर्ण। इस शिला पर महाराज अशोक के १४ अभिलेख तथा शक क्षत्रप रुद्रदामन् का अभिलेख भी उकीर्ण हैं। नई दिल्ली के राष्ट्रीय संग्रहालय के मुख्य द्वार के सामने केवल अशोक के अभिलेखों वाले भाग का प्रतिरूप स्थापित किया गया है।

लिपि : दक्षिण वर्ग की ब्राह्मी। इसे फ्लीट ने पांचमी शती ईसवी की सौराष्ट्री अथवा काठियावाड़ी लिपि कहा है। इसके अक्षर रुद्रदामन् के अभिलेख के अक्षरों का विकसित रूप कहे जा सकते हैं।

विषय : स्कन्दगुप्त द्वारा सुराष्ट्र के गोप्ता के रूप में पर्णदत्त की नियुक्ति तथा पर्णदत्त के पुत्र चक्रपालित द्वारा सुदर्शन झील के बाढ़ से टूटे हुए बांध का प्रति-संस्कार एवं विष्णु मन्दिर का निर्माण।

संदर्भ : फ्लीट, CII, III, No. 14; सरकार, SI, p. 307; पाण्डेय, HLI, p. 92; दशरथ शर्मा, JGNJRI, 6, pp. 303; दिसकलकर, SSI, pp. 44-60.

[भाग—क]

१. सिद्धम् [।।*] श्रियमभिमत-भोग्यां नैक-कालापनीतां त्रिदश-पति-सुखार्त्थं यो बलेराजहार। कमल-निलयनायाः शाश्वतं धाम लक्ष्म्याः

२. स जयति विजितार्त्तिर्व्विष्णुरत्यन्त-जिष्णुः ।।[१*] तदनु जयति शश्वत् श्री-परिक्षिप्त-वक्षाः स्व-भुज-जनित-वीर्यो राजराजाधि-राजः। नरपति-

१. शश्वच्छ्री॰ पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. भुजगानां मान-दर्प्पोत्फणानां प्रतिकृति-गरुडा[ज्ञां] निर्व्विषीं चावकर्त्ता ।।[२*] नृपति-गुण-निकेतः स्कन्दगुप्तः पृथु-श्रीः[१] चतुरुदधि-[जला]न्तां स्फीत-पर्यन्त-देशाम् ।

४. अवनिमवनतारिर्यः[२] चकारात्म-संस्थां पितरि सुर-सखित्वं प्राप्तवत्यात्म-शक्त्या ।।[३*] अपि[३] च जित[मे]व तेन प्रथयन्ति यशांसि यस्य रिपवो[ऽ*]पि [।*] आमूल-भग्न-दर्प्पा नि[वंचना म्लेच्छदेशेषु][४] ।।[४*]

५. क्रमेण बुद्ध्या निपुणं प्रधार्य्य ध्यात्वा च कृत्स्नान्गुण-दोष-हेतून् । व्यपेत्य सर्वान्मनुजेन्द्र-पुत्रांल्लक्ष्मीः[५] स्वयं यं वरयांचकार ।।[५*] तस्मिन्नृपे शासति नैव कश्चिद्धर्म्मादपेतो मनुजः प्रजासु ।

६. आर्तो दरिद्रो व्यसनी कदर्यो दण्डेन[६] वा यो भृशपीडितः स्यात् ।। [६*] एवं स जित्वा पृथवीं समग्रां भग्नाग्रदर्पा[न्] द्विषतश्च कृत्वा । सर्व्वेषु देशेषु विधाय गोप्तृन्[७] संचिन्तया[मा]स बहु-प्रकारम् ।। [७*] स्यात्को [ऽ*]नुरूपो

७. मतिमान्विनीतो मेधा-स्मृतिभ्यामनपेत-भावः । सत्यार्ज्जवौदार्यनयोपपन्नो माधुर्य-दाक्षिण्य-यशो-[ऽ*]न्वितश्च ।।[८*] भक्तो-[ऽ*]नुरक्तो नृ-विशेष-युक्तः सर्व्वोपधाभिश्च विशुद्ध-बुद्धिः । आनृण्य-भावोपगतान्तरात्मा:[८] सर्व्वस्य लोकस्य हिते प्रवृत्तः ।। [९*]

---

१. °श्रीश्चतु° पढ़ें ।
२. °र्यश्चकारा° पढ़ें ।
३. फ्लीट : अपि ।
४. फ्लीट का अनुमान ।
५. पुत्रांँल्लक्ष्मी : पढ़ें ।
६. सरकार का पाठ : फ्लीट : दण्ड्[यो*]न ।
७. गोप्तॄन् पढ़ें ।
८. विसर्ग अनावश्यक ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

८. न्यायार्जने [ऽ*]र्थस्य च क: समर्थ: स्यादर्जितस्याप्यथ रक्षणे च ।
गोपायितस्यापि [च] वृद्धि-हेतौ वृद्धस्य पात्र-प्रतिपादनाय॥[१०*]
सर्व्वेषु भृत्येष्वपि संहतेषु यो मे प्रशिष्यान्निखिलान्सुराष्ट्रान् ।
आं ज्ञातमेक: खलु पर्णदत्तो भारस्य तस्योद्वहने समर्थ: ॥[११*]

९. एवं विनिश्चित्य नृपाधिपेन नैकानहो-रात्र-गणान्स्व-मत्या । य: संनियुक्तो[ऽ*]र्थनया कथंचित् सम्यक्सुराष्ट्रावनिपालनाय ॥[१२*] नियुज्य देवा वरुणं प्रतीच्यां स्वस्था यथा नोन्मनसो बभूवु[:] [।*] पूर्व्वेतरस्यां दिशि पर्णदत्तं नियुज्य राजा धृतिमांस्तथा [ऽ*] भूत् ॥[१३*]

१०. तस्यात्मजो ह्यात्मज-भाव-युक्तो द्विधेव चात्मात्म-वशेन नीत: । सर्व्वात्मना[ऽऽ*]त्मेव च रक्षणीयो नित्यात्मवानात्मज-कान्त-रूप: । (॥) [१४*] रूपानुरूपैर्ललितैर्व्विचित्रै:[1] नित्य-प्रमोदान्वित-सर्व-भाव: । प्रबुद्ध-पद्माकर-पद्म-वक्त्रो नृणां शरण्य: शरणागतानाम् । ॥[१५*]

११. अभवद्भुवि चक्रपालितो [ऽ*]सावविति नाम्ना प्रथित: प्रियो जनस्य । स्व-गुणैरनुपस्कृतैरुदा[त्तै]: पितरं यश्च विशेषयांचकार । (॥)[१६*] क्षमा प्रभुत्वं विनयो नयश्च शौर्यं विना शौर्य-मह[ा]र्च्चनं च । दाक्ष्यं[2] दमो दानमदीनता च दाक्षिण्यमानृण्यम[शू]न्यता च । (॥)[१७*] सौंदर्यमार्येतरनिग्रहश्च[3] अविस्मयो धैर्यमुदीर्णता च ।

१२. इत्येवमेते[ऽ*]तिशयेन यस्मिन्नविप्रवासेन गुणा वसन्ति । (॥) [१८*] न विद्यते[ऽ*]सौ सकले[ऽ*]पि लोके यत्रोपमा तस्य गुणै: क्रियेत । स एव कार्त्स्न्येन गुणान्वितानां बभूव नृणामुपमानभूत: । (॥)[१९*] इत्येवमेतानधिकानतो[ऽ*]न्यान्गुणान्प-

१. 'विचित्रैर्नित्य' पढ़ें ।

२. फ्लीट : वाक्यं ।

३. छन्द के कारण सन्धि नहीं की गई ।

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[री]क्ष्य स्वयमेव पित्रा। यः संनियुक्तो नगरस्य रक्षां विशिष्य पूर्वान्प्रचकार सम्यक्। (॥)[२०*]

१३. आश्रित्य वीर्यं [स्वभुज-द्वयस्य स्वस्यैव नान्यस्य नरस्य दर्पं।[1] नोद्वेजयामास च कंचिदेवमस्मिन्पुरे चैव शशास दुष्टा:(न्) (॥) [२१*] विस्रंभमल्पेन शशाम यो[ऽ*]स्मिन्कालेन लोकेषु स-नागरेषु। यो लालयामास च पौर-वर्गान् [पितेव ?]-पुत्रान्सु-परीक्ष्य दोषान्। (॥)[२२*] संरंज्यां च प्रकृत्तीर्बभूव पूर्व्व-स्मिताभाषणमान-दानैः।

१४. निर्यन्त्रणान्योन्य-गृह-प्रवेशैः[2] संवर्द्धित-प्रीति-गृहोपचारैः। (॥) [२३*] ब्रह्मण्य-भावेन परेण युक्तः शुक्लः[3] शुचिर्दान-परो यथा-वत्। प्राप्यान्स काले विषयान्सिषेवे धर्मार्थयोश्चा[प्य*]विरोध-नेन। (॥)[२४*] यो [ऽ*जायतास्मात्खलु][4] पर्णदत्तात्स न्याय-वानत्र किमस्ति चित्रं। मुक्ता-कलापाम्बुज-पद्म-शीताच्चन्द्रा-त्किमुष्णं भविता कदाचित्। (॥)[२५*]

१५. अथ[5] क्रमेणाम्बुद-काल आग[ते नि]दाघ-कालं प्रविदार्य तोयदैः। ववर्ष तोयं बहु संततं चिरं सुदर्शनं येन बिभेद चात्वरात्[6]। ॥ [२६*] संवत्सराणामधिके शते तु त्रिंशद्भिरन्यैरपि षड्भि-रेव। रात्रौ दिने प्रौष्ठपदस्य षष्ठे गुप्त-प्रकाले[7] गणनां विधाय[8]। ॥ [२७*]

---

१. दर्पम् पढ़ें।
२. 'शै' के स्थान पर 'शा' दिखाई देता है।
३. फ्लीट तथा सरकार : शक्लः (=प्रियंवदः)।
४. सरकार का अनुमान।
५. फ्लीट : अथा।
६. च+अत्वरात् (=सहसा)।
७. भाऊदाजी का पाठ—गुप्तस्य कालाद्—फ्लीट तथा सरकार को स्वीकार्य नहीं है।
८. 'धा' तथा 'य' के बीच में अन्तराल है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१६. इमाश्च या रैवतकाद्विनिर्गता[:*] पलाशिनीयं सिकता-विला-
सिनी । समुद्रकान्ता:[1] चिर-बन्धनोषिताः पुनः पतिं शास्त्र-यथो-
चितं ययुः । (।।)[२८*] अवेक्ष्य वर्षागम-जं महोद्भ्रमं महोदधे-
रूर्जयता प्रियेप्सुना । अनेक-तीरान्तज-पुष्प-शोभितो

१७. नदीमयो हस्त इव प्रसारितः । (।।)[२९*] विषाद्य[मानाः खलु
सर्वतो ज]नाः कथं-कथं कार्यमिति प्रवादिनः । मिथो हि पूर्वापर-
रात्रमुत्थिता विचिन्तयां चापि बभूवुरुत्सुकाः । (।।)[३०*]
अपीह लोके सकले सुदर्शनं पुमां(मान्) हि दुर्दर्शनतां गतं(तः)
क्षणात् ।

१८. भवेन्नु सो[ऽ*]म्भोनिधि[2]-तुल्य-दर्शनं सुदर्शनं [– –⏑–
⏑–] [।।३१*] [– – –]वणे स भूत्वा पितुः परां
भक्तिमपि प्रदर्श्य । धर्मं पुरोधाय शुभानुबन्धं राज्ञो हितार्थं नग-
रस्य चैव । (।।) [३२*] संवत्सराणामधिके शते तु

१९. त्रिंशद्भिरन्यैरपि सप्तभिश्च । [गुप्त-प्रकाले नय]-शास्त्रवेत्ता[3]
विश्वो[4] [ऽ*]प्यनुज्ञात-महाप्रभावः । (।।)[३३*] आज्य-प्रणामैः[5]
विबुधानथेष्ट्वा धनैर्द्विजातीनपि तर्पयित्वा । पौरांस्तथा[ऽ*]-
भ्यर्च्य यथार्ह-मानैः[6] भृत्यांश्च पूज्यान्सुहृदश्च दानैः ।
(।।)[३४*]

२०. ग्रैष्मस्य मासस्य तु पूर्व-प[क्षे] [– – – प्र]थमे [ऽ*]ह्नि
सम्यक् । मासद्वयेनादरवान्स भूत्वा धनस्य कृत्वा व्ययमप्रमेयम् ।
(।।)[३५*] आयामतो हस्त-शतं समग्रं विस्तारतः षष्टिरथापि
चाष्टौ ।

---

१. °कान्ताश्चिर—पढ़ें ।
२. फ्लीट : साम्भोनिधि-° ।
३. वही : °वेत्ता ।
४. विश्वे पढ़ें ।
५. प्रणामैर्विबु° पढ़ें ।
६. मानैर्भृ° पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२१. उत्सेधतो[ऽ*]न्यत् पुरुषाणि [सप्त ? ⌣ – ⌣ – ह]स्तशत-द्वयस्य । (।।)[३६*] बबन्ध यत्नान्महता नृदेवान[भ्यर्च्य ?] सम्यग्घटितोपलेन । अ-जाति-दुष्टम्प्रथितं तटाकं सुदर्शन शाश्वतकल्प-कालम् । (।।)[३७*]

२२. अपि च सुदृढ-सेतु-प्रान्त(?)-विन्यस्त-शोभ-रथचरण-समाह्व-क्रौंच-हंसास-धूतम् । विमल-सलिल[– – –⌣– –⌣– –] भुवि त[⌣⌣⌣ – – –]द[ने] (ऽ*)र्क: शशी च । (।।)[३८*]

२३. नगरमपि च भूयाद्वृद्धिमत्पौर-जुष्टं द्विज-बहु-शत-गीत-ब्रह्म-निर्नष्ट-पापं[1] । शतमपि च समानामीति-दुर्भिक्ष[मुक्तं ⌣⌣⌣ ⌣⌣⌣ – – –⌣– –⌣– –] [।।३९*] [इति सुद]र्शन-तटाक-संस्कार-ग्रंथ-रचना [स]माप्ता ।।

[भाग—ख]

२४. दृप्तारि-दर्प-प्रणुदः पृथु-श्रियः स्व-वङ्श[2]-केतोः सकलावनी-पतेः । राजाधिराज्याद्भुत[3]-पुण्य-[कर्मणः] [– –⌣– –⌣⌣– –⌣ –⌣] [।।४०*] [– –⌣– –⌣⌣–⌣– – – –⌣– –⌣⌣ –⌣ – –] [।] द्वीपस्य गोप्ता महतां च नेता दण्डस्थि[ता]नां

२५. द्विषतां दमाय । (।।)[४१*] तस्यात्मजेनात्म-गुणान्वितेन गोविन्द पादर्पित-जीवितेन । [- -⌣- -⌣ ⌣ - ⌣ - - - - ⌣– -⌣⌣ - ⌣ - -] [।।४२*] [- -⌣-⌣⌣ -⌣ ⌣-⌣-]ग्धं विष्णोश्च पाद-कमले समवाप्य तत्र । अर्थ-व्ययेन

२६. महता महता[4] च कालेनात्म-प्रभाव-नत-पौर-जनेन तेन । (।।) [४३*] चक्रं बिभर्ति रिपु [- ⌣ ⌣ - ⌣ - - - - ⌣ - ⌣

---

१. पापम् पढ़ें ।

२. वंश पढ़ें ।

३. सरकार राजाधिराजा° पाठ अच्छा समझते हैं ।

४. सरकार ; महतामहता (=महता+अमहता) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

⏑⏑ - ⏑⏑ - ⏑ - -] [।] [- - ⏑ - ⏑⏑⏑ - ⏑⏑
- ⏑ - -] तस्य स्व-तंत्र-विधि-कारण-मानुषस्य । (।।)[४४*]

२७. कारितमवक्र-मतिना चक्र-भृतः चक्रपालितेन गृहं । वर्ष-शते-[ऽ*]ष्टात्रिंशे गुप्तानां काल-[क्रम-गणिते] [।।४५*] [- - ⏑ - ⏑⏑⏑ - ⏑⏑ - ⏑ - - - - ⏑ - ⏑⏑⏑ - - ⏑⏑ — ⏑ - -[।*] [सा]र्थमुत्थितमिवोर्जयतो [ऽ*]चलस्य

२८. कुर्वत्प्रभुत्वमिव भाति पुरस्य मूर्ध्नि ।।[४६*] अन्यस्य मूर्द्धनि सु[- ⏑⏑ - ⏑ - - - - ⏑⏑⏑ - ⏑⏑ - ⏑ - -] [।*] - - ⏑ - ⏑⏑⏑]

२९. रुद्ध-विहंग-माग विभ्राजते [⏑⏑⏑ - ⏑⏑ - ⏑ - -] [।।४७*]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्कन्दगुप्त-कालीन कहाऊँ स्तम्भ अभिलेख

गुप्त संवत् १४१

स्थान : उत्तर-प्रदेश के गोरखपुर जिले में कहाऊँ (कुकुम) ग्राम के निकट उत्तर की ओर स्थित स्तम्भ पर उत्कीर्ण।

लिपि : उत्तरी ब्राह्मी, समुद्रगुप्त के इलाहाबाद स्तम्भ अभिलेख की लिपि के सदृश।

भाषा : संस्कृत।

विषय : मद्र नामक व्यक्ति द्वारा पाँच आदिकर्ता जैन तीर्थङ्करों की प्रतिमाओं तथा इस स्तम्भ की स्थापना।

संदर्भ : फ्लीट, CII, III, No, 15; सरकार, S1, P. 316; पाण्डेय, HLI, p. 92; IHQ, 28, p. 298.

१. सिद्धम्[1] [।।*] यस्योपस्थान-भूमिर्नृपति-शत-शिरः[2]-पात-वाता-वधूता

२. गुप्तानां वन्शजस्य[3] प्रविसृत-यशसस्तस्य सर्व्वोत्तमर्द्धेः [।*]

३. राज्ये शक्रोपमस्य क्षितिप-शत-पतेः स्कन्दगुप्तस्य शान्ते

---

१. मूल में पंक्ति २ तथा ३ के बाईं ओर प्रान्त में 'सि' ऊपर और 'द्धं' नीचे उत्कीर्ण हैं।

२. विसर्ग से आगे एक छोटी पड़ी रेखा है जिसे फ्लीट और सरकार ने भूल से उत्कीर्ण किया गया अनावश्यक अर्धविराम चिन्ह बताया है। हमारे बिचार से यह रेखा शिरः तथा पात को एक ही समस्तपद के भाग दिखाने के लिए प्रयुक्त की गई है। इसके बिना विसर्ग तथा 'प' के बीच का अन्तराल भ्रामक हो सकता था।

३. वंशजस्य पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४. वर्षे त्रिन्शद्दशैकोत्तरक[1]-शततमे ज्येष्ठ-मासि प्रपन्ने । (॥) [१*]

५. ख्याते[ऽ*]स्मिन्ग्राम-रत्ने कुकुभ इति जनैस्साधु-संसर्ग-पूते ।[2]

६. पुत्रो यस्सोमिलस्य प्रचुर-गुण-निधेर्भट्टिसोमो महा[त्म]ा [।*]

७. तत्सूनू रुद्रसोम[:*] पृथुल-मति-यशा व्याघ्र इत्यन्य-संज्ञो ।

८. मद्रस्तस्यात्मजो[ऽ*]भूद्द्विज-गुरु-यतिषु प्रायशः प्रीतिमान्यः । (॥) [२*]

९. पुण्य-स्कन्धं स चक्रे जगदिदमखिलं संसरद्वीक्ष्य भीतो

१०. श्रेयोर्त्थं भूत-भूत्यै पथि वि(नि)यमवतामर्हतामादिकर्तॄन्[3] [।*]

११. पञ्चेन्द्रां(न्) स्थापयित्वा धरणिधरमयान्सन्निखातस्ततो[ऽ*]-यम् (यं)

१२. शैलस्तम्भः सुचारुर्गिरिवर-शिखराग्रोपमः कीर्त्ति-कर्त्ता[॥३*]

---

१. त्रिंशद्दशै॰ पढ़ें ।

२. अर्धविराम की रेखा अनावश्यक है।

३. ॰कर्तॄन् पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्कन्दगुप्त-कालीन इन्दौर ताम्र-पट्ट अभिलेख

गुप्त संवत् १४६

स्थान : उत्तरप्रदेश के बुलन्दशहर जिले में टिमाई से ८ किलोमीटर परे इन्दौर नामक उजड़े गाँव के निकट एक नाले में से प्राप्त ताम्र-पट्ट पर उत्कीर्ण। वह गाँव अब खेड़ा मात्र रह गया है।

लिपि : उत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : देवविष्णु नामक ब्राह्मण द्वारा इन्द्रपुर (इन्दौर) में स्थित सूर्य-मंदिर में दीपक जलाने के व्ययहेतु स्थायी दान।

सन्दर्भ : फ्लीट, CII, III. No. 16; सरकार, SI, p. 318; कीलहॉर्न IA, 18, p. 219.

१. सिद्धम् [।।*] यं विप्रा विधिवत्प्रबुद्ध-मनसो ध्यानैक-तानास्तुव:[1]
यस्यान्तं त्रिदशासुरा न विविदुर्न्नोर्ध्वं न तिर्य-

२. ग्गतिम् [।*] यं लोको बहु-रोग-वेग-विवशः संश्रित्य चेतोलभः
पायाद्वः स जगत्पिधान-पुटभिद्रश्म्या-

---

१. सरकार का संशोधन : स्तवा:। इसकी आवश्यकता नहीं है क्योंकि 'स्तू' पद भी सिद्ध है जिसका यह प्रथमा बहुवचन रूप है। सरकार का दूसरा सुझाव-स्तुमः स्वीकार्य नहीं है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. करो भास्करः ॥[१*] परमभट्टारक-महाराजाधिराज-श्री-स्कन्दगुप्तस्याभिवर्द्धमान-विजय-राज्य[1]-संव्वत्सर-शते षच्च(ट्च)-त्वा-

४. [रि]ङ्शदुत्तरतमे[2] फाल्गुन-मासे तत्पाद-परिगृहीतस्य विषय-पति-शर्व्वनागस्यान्तर्व्वेद्यां भोगाभिवृद्धये वर्त्त-

५. माने चेन्द्रापुरक[3]-पद्मा-चातुर्व्विद्य-सामान्य-ब्राह्मण-देवविष्णु-र्द्देवपुत्रो हरित्रात-पौत्त्रः डुडिक-प्रपौत्त्रः सततग्नि-हो-

६. त्त्र-छ(च्छ)न्दोगो राणायणी(नी)यो वर्षगण-सगोत्त्र इन्द्रापुरक-वणिग्भ्यां क्षत्त्रियाचलवर्म-भृ(भ्रु)कुण्ठसिङ्हाभ्या-मधिष्ठा[4]

७. नस्य प्राच्यां दिशीन्द्रपुराधिष्ठान-माडास्यात-लग्नमेव प्रतिष्ठा-पितक-भगवते सवित्रे दीपोपयोज्यमात्म-यशो-

८. [ऽ*]भिवृद्धये मूल्यं प्रयच्छतिः (ति) [।*] इन्द्रपुर-निवासिन्या-स्तैलिक-श्रेण्या जीवन्त-प्रवराया इतो[ऽ*]धिष्ठानादपक्रम-

९. ण-संप्रवेश-यथास्थिरायाः आजस्त्रिकं ग्रहपतेर्द्विज-मूल्य-दत्तमनया[5] तु श्रेण्या यदभग्नयोगम्[।*]

---

१. फ्लीट, 'राज्ये' संशोधन करते हैं ।

२. °चत्वारिंश० पढ़ें ।

३. फ्लीट : चन्द्रापुरक । पंक्ति ६ में इन्द्रापुरक तथा ७, ८ में इन्द्रपुर ।

४. फ्लीट : °धिष्टा ।

५. दत्तम् । अनया पाठ अच्छा रहता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१०. प्रत्थ(थ)माहर्व्य[व*]च्छिन्न-संस्थं[1] देयं तैलस्य तुल्येन[2] पल-द्वयं तु २[3] चन्द्रावर्क्क-सम-कालीयं [।*]

११. यो व्यक्क्रमेद्दायमिमं[4] निबद्धम्(द्धं) गो-घ्नो गुरु-घ्नो द्विज-घातकः सः [।*] तैः पातकै [:*]

१२. पञ्चभिरन्वितो[ऽ*]धर्ग्ग(धो ग)च्छेन्नरः सोपनिपातकैश्चेति ॥[२*]

---

१. सरकार : प्रथमाहोथ्यच्छिन्न° ।

२. तौल्येन से अभिप्राय है ।

३. संभवतः तुल्येन पलद्वयं का संक्षेप ।

४. सरकार : योऽतिक्रमे° संशोधन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्कन्दगुप्त का भिटारी स्तम्भ अभिलेख

स्थान : उत्तर प्रदेश के गाजीपुर जिले में भिटारी ग्राम के बाहर स्थित स्तम्भ पर उत्कीर्ण ।

लिपि : उत्तरी ब्राह्मी, चन्द्रगुप्त (द्वितीय) के मथुरा अभिलेख से मिलती जुलती ।

भाषा : संस्कृत ।

विषय : स्कन्दगुप्त द्वारा भगवान् शार्ङ्गी (विष्णु) की प्रतिमा एवं इस स्तम्भ को स्थापित करके विष्णु मन्दिर के लिए भिटारी ग्राम का प्रदान ।

संदर्भ : फ्लीट, CII, III, No. 13; सरकार, SI, P. 321; पाण्डेय, HLI, P. 99; छाबड़ा, JIH,41, Pt. 3, pp. 543; उपेन्द्र ठाकुर, IHQ, 37, pp. 279-86; जगन्नाथ, IHQ, 22, pp. 112; ABORI, (1968) Golden Jubilee Vol. pp. 325-27; दशरथ शर्मा, JIH, 43, pt. 1, pp. 219-25.

१. [सिद्धम्[१]][।।*] [सर्व्व]-राज[ोच्छे]त्तु: पृथिव्यामप्रतिरथस्य चतु-
रुदधि-सलिलास्वादित-यशसो धनद-वरुणेन्द्र[ा]न्तक-स[मस्य]

२. कृतान्त-परशोः न्यायागत[ा]नेक-गो-हिरण्य-क[ो]टि-प्रदस्य
चिरो[त्स]न्नाश्वमेधाहर्त्तुर्महाराज-श्री-गुप्त-प्रपौत्र[स्य]

३. महाराज-श्री-घटोत्कच-पौत्रस्य महाराजाधिराज-श्री-चन्द्रगुप्त-
पुत्रस्य लिच्छिवि[२]-दौहित्रस्य महादेव्यां कुम[ा]र[दे]व्या-

४. मुत्पन्नस्य महाराजाधिराज-श्री-समुद्रगुप्तस्य पुत्रस्तत्परिगृहीतो
महादेव्यान्दत्तदेव्यामुत्पन्नः स्वयं चाप्रतिरथः

---

१. प्रथम पंक्ति के ऊपर इस शब्द के कुछ चिह्न दिखाई देते हैं ।

२. सामान्यत लिच्छवि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५. परम-भागवतो महाराजाधिर[ा]ज-श्री-चन्द्रगुप्तस्तस्य पुत्रस्तत्पादानुद्ध्यातो महादेव्यां ध्रुवदेव्यामुत्पन्नः परम-

६. भागवतो महाराजाधिर[ा]ज-श्री-कुमारगुप्तस्तस्य— प्रथित-पृथु-मति-स्वभाव[1]-शक्तेः पृथु-यशसः पृथिवी-पतेः पृथु-श्रीः[।*]

७. पि[तृ]-प[रि]गत-पाद-पद्म-वर्त्ती प्रथित-यशाः पृथिवी-पतिः सुतो [ऽ*]यम् [॥१*] जगति भु[ज[-बलाड्यो(ढ्यो) गुप्त-वङ्शैक-वीरः प्रथित-विपुल-

८. धामा नामतः स्कन्दगुप्तः [।*] सुचरित-चरितानां येन वृत्तेन वृत्तं न विहतममलात्मा तान-धीदा-विनीतः [॥२*] विनय-

९. बल-सुनीतैर्व्विक्क्रमेण क्क्रमेण प्रतिदिनमभियोगादीप्सितं येन ल[ब्ध्व]ा [।*] स्वभिमत-विजिगीषा-प्रोद्यतानां परेषां प्रणि-

१०. हित इव लो[के[2] सं]विधानोपदेशः [॥३॥*] विचलित-कुल-लक्ष्मी-स्तम्भनायोद्यतेन क्षितितलशयनीये येन नीतास्त्रियामाः[3] [।*] समु-

११. दित-बल-कोषान्पुष्यमित्रांश्च[4][जि]त्वा क्षितिप-चरण-पीठे स्था-पितो वाम-पादः [॥४*] प्रसभमनुप[मैर्व्विध्वस्त-शस्त्र-प्रतापै-र्विन[य-स]मु-

१२. [चितैश्च] क्षान्ति-शौ[र्यै]र्न्निरूढम् [।*] चरितमल-कीर्त्तेर्ग्गीयते यस्य शुभ्रं दिशि-दिशि परितुष्टैराकुमारं मनुष्यैः [॥५*] [पितरि दिवमुपे[ते]

१३. विप्लुतां वङ्श[5]-लक्ष्मीं भुज-बल-विजितारिर्यः प्रतिष्ठाप्य भूयः [।*] जितमिति परितोषान्मातरं सास्र-नेत्रां हत-रिपुरिव कृष्णो देवकीमभ्युपे-

---

१. जगन्नाथ : प्रभाव ।
२. जमन्नाथ का सुझाव । फ्लीट आदि : लेभे ।
३. फ्लीट तथा सरकार : नीता त्रियामा ।
४. भण्डारकर : °युध्यिमित्रांश्च (=युधि+अमित्रांश्च) ।
५. वंश पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४. [त:][1] [।।६*] [स्वै]र्द्द[ण्डैः ⏑⏑]रत्यु[–]त्प्रचलितं वङ्शं[2] प्रतिष्ठाप्य यो बाहुभ्यामवनिं विजित्य हि जितेष्वार्त्तेषु कृत्वा दयाम् [।*] नोत्सिक्तो [न] च विस्मितः प्रतिदिनं

१५. संवर्द्धमानद्युतिर्गीतैश्च[3] स्तुतिभिश्च वृत्तकथने[3] यं ह्लेपत्यार्य्यता[4] [।।७*] हूणैर्य्यस्य समागतस्य समरे दोर्भ्यां धरा कंपिता भीमावर्त्त-करस्य

१६. शत्रुषु शरा [– –⏑–पातिताः ।*]–––⏑⏑–⏑–विरचित प्रख्यापितो [दीप्ति-दा] नद्योति [⏑] नभीषु लक्ष्यत इव श्रोत्रेषु शार्ङ्ग[5]-ध्वनिः [।।८*]

१७. [स्व]-पितुः कीर्ति—……………⏑–⏑ [।]…………… …⏑–………⏑–⏑ [।।९*] न यस्य[6] प्रतिमा[7] काचित्प्रतमां तस्य शार्ङ्गिणः [।*]

१८. [स][8] प्रतीतश्चकारेमां [यावदाचन्द्र-तारकम् [।।१०*] इह चैनां प्रतिष्ठाप्य सुप्रतिष्ठित-शासनः [।*] ग्राममेनं स विदधे पितुः पु[ण्य]ाभिवृद्धये [।।११*]

१९. अतो भगवतो मूर्त्तिरियं यश्चात्र संस्थितः (?) [।*] उभयं निर्द्दिदेशासौ पितुः पुण्याय पुण्य-धीरिति[9] [।।१२*]

---

१. कुछ विद्वान स्कन्दगुप्त की माता का नाम देवकी ग्रहण करते हैं ।
२. वंश पढ़ें ।
३. साधुराम का पाठ । फ्लीट : वन्दकज[नो?] यं प्रापयत्यार्य्यताम् ।
४. छाबड़ा : वन्दकजनैर्यः ख्यापयत्यार्य्यंताम्; जगन्नाथ : वृत्तकथनैर्यं ह्लेपयत्यार्य्यता ।
५. फ्लीट : गार्ङ्ग॰ ।
६. छाबड़ा का पाठ । फ्लीट : कर्त्तव्या । भण्डारकर : प्रकार्य्या ।
७. यहां उपमा अर्थ में प्रयुक्त ।
८. छाबड़ा का पाठ । फ्लीट : सु॰ ।
९. ॰धी : ।।इति।। पाठ अच्छा रहता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बुधगुप्त-कालीन सारनाथ बुद्ध-प्रतिमा अभिलेख

गुप्त संवत् १५७

स्थान : उत्तर प्रदेश के वाराणसी नगर के समीप प्रसिद्ध बौद्ध स्थल सारनाथ स प्राप्त एक बुद्ध-प्रतिमा के नीचे उत्कीर्ण ।

लिपि : उत्तरी ब्राह्मी ।

भाषा : संस्कृत ।

विषय : बौद्ध भिक्षु अभयमित्र द्वारा भगवान् बुद्ध की प्रतिमा की स्थापना ।

सन्दर्भ : गुप्ते, ASI AR, 1914-15, pp. 124-25; सरकार, SI, p. 331; पाण्डेय, HLI, P. 103; IHQ, 19, pp. 119 ff. and pp. 272.

१. गुप्तानां समतिक्रान्ते सप्त-पंचाशदुत्तरे [।*] शते समानां पृथिवीं बुधगुप्ते प्रशासति ॥[१*] [वैशाख-मास-सप्तम्यां मूले श्यामगते]

२. मया [।*] कारिता[ऽ*]भयमित्रेण प्रतिमा शाक्य भिक्षुणा ॥ [२*] इमामुद्दण्ड[1]-सच्छत्र-पद्मास[न-विभूषितां] [।*] [देवपुत्रवतो दिव्यां]

३. चित्र-वि[न्या]सचित्रितां[2] ॥[३*] यदत्र[3] पुण्यं प्रतिमां कारयित्वा मया भृतम्[4] [।*]माता-[पित्रोर्गुरूणां च लोकस्य च समाप्तये] [॥४*]

---

१. गुप्ते : मुद्धस्त° ।

२. चित्रिताम् पढ़ें । गुप्ते : चित्रविद्यासर्चित्रितां ।

३. सरकार : यदस्ति ।

४. सरकार : ममास्तु तत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बुधगुप्त-कालीन एरण स्तम्भ अभिलेख

गुप्त संवत् १६५

स्थान : मध्यप्रदेश के सागर जिले में एरण ग्राम के लगभग एक किलोमीटर पश्चिम को सुप्रसिद्ध मन्दिर-समूह के निकट स्थित स्तम्भ पर उत्कीर्ण।

लिपि : उत्तरी ब्राह्मी, कई रूपों में समुद्रगुप्त के इलाहाबाद स्तम्भ अभिलेख की लिपि से मिलती जुलती।

भाषा : संस्कृत।

विषय : बुधगुप्त के सामन्त सुरश्मिचन्द्र के अधीन एरण के प्रशासक मातृविष्णु और उसके अनुज धन्यविष्णु द्वारा भगवान् जनार्दन (विष्णु) के ध्वजस्तम्भ की स्थापना।

संदर्भ : फ्लीट. CII, III, No. 19; सरकार, SI, p. 334; पाण्डेय, HLI, P. 106; हाल, JBAS, 7, pp. 633 ff.

१. जयति विभुश्चतुर्भुजश्चतुरर्णव-विपुल-सलिल-पर्य्यङ्कः [।*] जगतः स्थित्युत्पत्ति-[व्ययादि]-[१]

२. हेतुर्ग्गरुड-केतुः [।।१*] शते पञ्च-षष्ट्यधिके वर्षाणां भूपतौ च बुधगुप्ते। आषाढ-मास-[शुक्ल]-

३. द्वादश्यां[२] सुरगुरोर्दिवसे। [।२*] सं १०० ६० ५ [।।*] कालिन्दी-नर्म्मदयोर्म्मध्यं पालयति लोकपाल-गुणैर्ज्ज (णैः। ज)-गति महार[ाज]-

४. श्रियमनुभवति सुरश्मिचन्द्रे च। [।३*] अस्यां संवत्सर-मास-दिवस-पूर्व्वायां[३] स्व-कर्म्माभिरतस्य क्रतु-याजि[नः]

---

१. फ्लीट तथा सरकार हाल (Hall) का अनुसरण करके 'न्ययादि' पढ़ते हैं।

२. प्रिंसेप : त्रयोदश्यां।

३. तिथौ का अभिप्राय पूर्व्वायां में निहित हैं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५. अधीत-स्वाध्यायस्य विप्रर्षेर्म्मैत्रायणीय-वृषभस्येन्द्रविष्णोः प्रपौत्रेण पितुर्गुणानुकारिणो वरुण [विष्णोः]

६. पौत्रेण पितरमनुजातस्य स्व-वंश-वृद्धि-हेतोर्हरिविष्णोः पुत्रेणा-त्यन्त-भगवद्भक्तेन विधातुरिच्छया स्वयंवरयेव र [ा]ज-

७. लक्ष्म्याधिगतेन चतुः-समुद्र-पर्य्यन्त-प्रथिता-यशसा अक्षीण-मान-धनेनानेक-शत्रु-समर-जिष्णुना महाराज-मातृविष्णुन[ा]

८. तस्यैवानुजेन तदनुविधायिन[ा] तत्प्रसाद-परिगृ[ही]तेन धन्य-विष्णुना च ।[1] मातृपित्रोः (माता-पित्रोः) पुण्याप्यायनार्थमेष भगवतः ।[2]

९. पुण्य-जनार्द्दनस्य जनार्द्दनस्य ध्वज-स्तम्भो [ऽ*] भ्युच्छ्रितः [।।*] स्वस्त्यस्तु गो-ब्राह्मण-[पु]रोगाभ्यः सर्व्वप्रजाभ्य इति । (।।)

१-२ ये अर्ध विराम चिन्ह अनावश्यक ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पट्टवाय-श्रेणि का मन्दसौर अभिलेख

मालव संवत्, ५२९

स्थान : मध्यप्रदेश के मन्दसौर नगर में शिवना नदी के एक घाट की दीवार में लगे प्रस्तरखण्ड पर उत्कीर्ण। यह प्रस्तर खण्ड मन्दिर से हटाकर वर्तमान स्थान पर लगाया गया है।

लिपि : दक्षिणी ब्राह्मी, जो पाँचवीं शताब्दी की पश्चिम-मालव-लिपि का उत्तम रूप है।

भाषा : संस्कृत ।

विषय : लाट विषय से रेशमी बुनकरों के दशपुर (मन्दसौर) में आकर बसने, उनके द्वारा सूर्यमन्दिर बनवाये जाने तथा कुछ वर्षों बाद इसी मन्दिर का जीर्णोद्धार कराए जाने का वर्णन ।

संदर्भ : फ्लीट, CII, III, No. 18; सरकार, SI, p. 299; पाण्डेय, p. 84; जगन्नाथ, JIH, 18; p. 118; दशरथ शर्मा, IC, 6, p. 110; दिसकलकर, SSI, PP. 61-75.

१. [सिद्ध]म् [।।] य[ो] [वृत्त्य]र्त्थमुपास्यते सुर-गणै[स्सिद्धैश्च] सिद्धयर्त्थिभिद्ध्यानैकाग्र-परैर्व्विधेय-विषयैर्म्मोक्षार्त्थिभिर्य्योगिभिः। भक्तया तीव्र-तपोधनैश्च मुनिभिश्शाप-प्रसाद-क्षमैर्हेतुर्य्यो जगत ×क्षयाभ्युदययो‿पायात्स वो भास्करः ।[।१*] तत्व [त्त्व]-ज्ञानविदो[ऽ*]पि यस्य न विदुर्ब्रह्मर्षे-

२. यो [ऽ*]भ्युद्यता ×कृत्स्नं यश्च गभस्तिभिः प्रविसृतै‿पुष्णाति-लोक-त्रयम् । गंधर्व्वामर-सिद्ध-किन्नर-नरैस्संस्तूयते[ऽ*]भ्युत्थितो-भक्तेभ्यश्च ददाति यो [ऽ*]भिलषितं तस्मै सवित्रे नमः ।[।२*]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

य ऽ प्रत्यहं प्रतिविभात्युदयाचलेन्द्र-विस्तीर्ण्ण-तुङ्ग-शिखर-स्खलितांशु-जाल: [।*] क्षीबांगना-

३. जन-कपोल-तलाभिताम्र ऽ पायात्स वस्सु[कि]रणाभ[रणो] विवस्वान् । [।३*] कुसुम-भरानत-तरुवर-देवकुल-सभा-विहार-रमणीयात् । लाट-विषयान्नगावृत-शैलाज्जगति प्रथित-शिल्पा: । [।४*] ते देश-पार्त्थिव-गुणापहृता: प्रकाशमद्ध्वादि-जान्यविरलान्यसुखा-

४. न्यपास्य । जातादरा दशपुरं प्रथमं मनोभिरन्वागतास्स-सुत-बन्धु-जनास्समेत्य ।।[५*] मत्तेभ-गण्ड-तट-विच्युत-दान-बिन्दु-सिक्तोपलाचल-सहस्र-विभूषणाया: [।*] पुष्पावनम्र-तरु-षण्ड[१]-वतंसकाया भूमे ऽ परन्तिलक-भूतमिदं क्रमेण ।।[६*] तटोत्थ-वृक्ष-च्युत-

५. नैक-पुष्प-विचित्र-तीरान्त-जलानि भान्ति । प्रफुल्त[२]पद्माभरणानि यत्र सरांसि कारण्डव-संकुलानि ।।[७*] विलोल-वीची-चलितारविन्द-पतद्रज:-पिञ्जरितैश्च हंसै: । स्व-केसरोदार-भरावभुग्नै: क्वचित्सरांस्यम्बुरुहैश्च भान्ति ।[।८*] स्व-पुष्प-भारावनतैर्न्नगेन्द्रैर्मद-

६. प्रगल्भालि-कुल-स्वनैश्च । अजस्र-गाभिश्च पुराङ्गनाभिर्व्वनानि यस्मिन्समलंकृतानि ।।[९*] चलत्पताकान्यबला-सनाथान्यत्यर्त्थ-शुक्लान्यधिकोन्नतानि । तडिल्लता-चित्र-सिताभ्र-कूट-तुल्योपमानानि गृहाणि यत्र[३] ।।[१०*] कैलास-तुङ्ग-शिखर-प्रतिमानि चान्यान्याभान्ति दीर्घ्व-वलभी-

---

१. फ्लीट : मण्ड; आर. जी. भण्डारकर ने 'खण्ड' संशोधन सुझाया ।

२. प्रफुल्ल पढ़ें ।

३. उत्तरमेध के प्रथम श्लोक-विद्युतवन्तं ललितवनिता:·· ·· की छाप यहां स्पष्ट है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

७. नि स-वेदिकानि । गान्धर्व्व-शब्द-मुखरानि (णि) निविष्ट-चित्र-कर्म्माणि लोल-कदली-वन-शोभितानि ॥[११*] प्रासाद-माला-भिरलंकृतानि धरां विदार्य्यैव समुत्थितानि । विमान-माला-सदृशानि यत्र गृहाणि पूर्ण्णेन्दु-करामलानि ॥[१२*] यद्भात्य-भिरम्य-सरिद्व(द्द्व)येन चपलोर्म्मिणा समुपगूढं[1] [।*]

८. रहसि कुच-शालिनीभ्यां प्रीति-रतिभ्यां स्मराङ्गमिव ॥[१३*] सत्य-क्षमा-दम-शम-व्रत-शौच-धैर्य्य-स्वाद्ध्याय-वृत्त-विनय-स्थिति बुद्ध्य् पेतैः[2] । विद्या-तपो-निधिभिरस्मयितैश्च विप्रैर्य्यद्भ्राजते ग्रह-गणै×खमिव प्रदीप्तैः ॥[१४*] अथ समेत्य निरन्तर-सन्ततै-रहरहः-प्रविजृम्भित-

९. सौहृदाः [।*] नृपतिभिस्सुतवत्प्रतिम[ा]निताः प्रमुदिता न्यवसन्त सुखं पुरे ॥[१५*] श्रवण-सुभगं धानुर्व्वे[द्यं] दृढं परिनिष्ठिताः सुचरित-शतासङ्गा×केचिद्विचित्र-कथाविदः । विनय-निभृता-स्सम्यग्धर्म्म-प्रसङ्ग-परायणा≍प्रियमपरुषं पत्थ्यं चान्ये क्षमा बहु भाषितुं (तुम्) ॥[१६*]

१०. केचित्स्वकर्म्मण्यधिकास्तथान्यैर्व्विज्ञायते ज्योतिषमात्मवद्भिः । अद्यापि चान्ये समर-प्रगल्भा×कुर्व्वन्त्यरीणामहितं प्रसह्य ॥[१७*] प्रज्ञा-मनोज्ञ-वधवः प्रथितोरु-वंशा वंशानुरूप-चरिता-भरणास्तथा [ऽ*]न्ये । सत्य-व्रताः प्रणयिनामुपकार-दक्षा विस्रम्भ-

११. [पूर्व्व]मपरे दृढ-सौहृदाश्च ॥[१८*]विजित-विषय-सङ्गै र्द्धर्म्म-शीलैस्तथा [ऽ*]न्यैर्[मृ[दुभिरधिक-सत्वै(त्त्वै)र्ल्लोक-यात्रामरैश्च । स्व-कुल-तिलक-भूतैर्मुक्त-रागैरुदारैरधिकमभिविभाति श्रेणिरेवं प्रकारैः ॥[१९*] तारुण्य-कान्त्युपचितो [ऽ*]पि सुवर्ण्ण-हार-तांबूल-पुष्प-विधिना सम-

---

१. °गूढम् पढ़ें ।

२. द्ध्य् में ध् साफ उत्कीर्ण नहीं है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१२. [लंकृ]तो [ऽ*]पि । नारी-जनः श्रियमुपैति[1] न तावदग्र्यां[2] यावन्न पट्टमय-वस्त्र-[यु[गानि धत्ते ।।[२०*] स्पर्श[व] ता[3] वर्णान्तर-विभाग-चित्रेण नेत्र-सुभगेन । यैस्सकलमिदं क्षितितलमलंकृतं पट्ट-वस्त्रेण ।।[२१*] विद्याधरी-रुचिर-पल्लव-कर्णपूर-वातेरितास्थिरतरं प्रविचिन्त्य

१३. [लो]कं । मानुष्यमर्थ-निचयांश्च तथा विशालांस्तेषां शुभा मतिरभूदचला ततस्तु[4] ।।[२२*] चतुस्समुद्रा[न्त]-विलोल-मेखलां सुमेरु-कैलास-बृहत्पयोधराम् । वनान्त-वान्त-स्फुट-पुष्प-हासिनीं कुमारगुप्ते प्रि(पृ)थिवीं प्रशासति ।।[२२*] समान-धीश्शुक्र-बृहस्पतिभ्यां ललाम-भूतो भुवि

१४. पार्त्थिवानां । रणेषु यः पार्त्थ-समान-कर्म्मा बभूव गोप्ता नृप-विश्वकर्म्मा ।।[२४*]दीनानुकंपन-परः कृपणार्त्त-वर्ग्ग-सन्ध[ा]-प्रदो[ऽ*]धिक-दयालुरनाथ-नाथः । कल्प-द्रुमः प्रणयिनामभयं-प्रदश्च[5] भीतस्य यो जनपदस्य च बन्धुरासीत् ।।[२५*] तस्यात्मजः स्थैर्य्य-नयोपपन्नो बन्धु-प्रिये

१५. बन्धुरिव प्रजानां(नाम्) । बंध्वर्त्ति-हर्त्ता नृप-बन्धुवर्म्मा द्विड्-[दृ]प्त-पक्ष-क्षपणैक-दक्षः ।।[२६*] कान्तो युवा रण-पटुर्व्विनया-न्वितश्च राजा[ऽ*]पि सन्नुपसृतो न मदैः स्मयाद्यैः । शृङ्गार-मूर्त्तिरभिभात्यनलंकृतो[ऽ*]पि रूपेण य[6] × कुसुमचाप इव द्वितीयः ।। [२७*] वैधव्य-तीव्र-व्यसन-क्षतानां

---

१. फ्लीट : श्रियमु° ।

२. फ्लीट °ग्रचां का °श्र्यां संशोधन करते हैं ।

३. जगन्नाथ : स्पर्शाज्जात । परन्तु छन्द में यह अनुकूल नहीं यद्यपि स्पर्शजात अनुकूल है ।

४. 'ततस्तु' का सम्बन्ध पंक्ति १६ में 'कारितं' के साथ है ।

५. अभयप्रदश्च पढ़ें ।

६. फ्लीट : या ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१६. स्मि(स्मृ)त्वा यमद्याप्यरि-सुन्दरीणां[1] । भयाद्भवत्यायत-लोचनानां घन-स्तनायास-करः प्रकम्पः ॥[२८*] तस्मिन्नेव क्षितिपतिवृि(वृ)षे बंधुवर्म्मण्युदारे सम्यक्स्फीतं दशपुरमिदं पालयत्युन्नतांसे । शिल्पावाप्तैर्द्धन-समुदयैः पट्टवायैरुदारं श्रेणी-भूतैर्भवनमतुलं कारितं

१७. दीप्त-रश्मेः ॥[२९*] विस्तीर्ण्ण-तुङ्ग-शिखरं शिखरि-प्रकाशमभ्युद्गतेन्द्वमल-रश्मि-कलाप-गौरं[2] । यद्भाति पश्चिम-पुरस्य[3] निविष्ट-कान्त-चूडामणि-प्रतिसमन्नयनाभिरामं[4] ॥[३०*] रामासनाथ-[र]चने दर-भास्करांशु-वह्नि-प्रताप-सुभगे जल-लीन-मीने । चन्द्रांशु-हर्म्यतल-

१८. चन्दन-तालवृन्त-हारोपभोध(ग)-रहिते हिम-दग्ध-पद्मे ॥[३१*] रोध्र्-प्रियंगु-तरु-कुन्दलता-विकोश-पुष्पासव-प्रमु[दि]तालि-कलाभिरामे । काले तुषार-कण-कर्क्कश-शीत-वात-वेग-प्रनृत्त-लवली-नगणैकशाखे ॥[३२*] स्मर-वशग-तरुणजन-वल्लभाङ्गना-विपुल-कान्त-पीनोरु-

१९. स्तन-जघन-घनालिङ्गन-निर्भर्त्सित-तुहिन-हिम-पाते[5] ॥[३३*] मालवानां गण-स्थित्या याते शत-चतुष्टये । त्रि-नवत्यधिके [ऽ*]ब्दानाम्रि(मृ)तौ सेव्य-घन-स्तने[6] ॥[३४*] सहस्य-मास-

---

१ °णाम् पढ़ें । वास्तव में पहले म् उत्कीर्ण किया गया था बाद में उसे काट कर णा पर अनुस्वार लगाया गया ।

२. गौरम् पढ़ें ।

३. पाण्डेय पश्चिमपुरे संशोधन प्रस्तुत करते हैं ।

४. °रामम् पढ़ें । फ्लीट : °रमं ।

५. यह सम्पूर्ण श्लोक एक समस्त पद है । यह प्रयासपूर्ण गौडी रीति का उदाहरण है ।

६. फ्लीट : स्वने ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुक्लस्य प्रशस्ते[ऽ*]ह्नि त्रयोदशे । मङ्गलाचार-विधिना प्रासादो [ऽ*]यं निवेशितः ।।[३५*] बहुना समतीतेन

२०. कालेनान्यैश्च पार्त्थिवैः । व्यशीर्य्यतैक-देशो[ऽ*]स्य भवनस्य ततो [ऽ*]धुना ।।[३६*] स्व-यशो-व्रि (वृ)द्धये सर्व्वमत्युदार-मुदारया संस्कारितमिदं भूयः श्रेण्या भानुमतो गृहं[1] ।।[३७*] अत्युन्नतमवदातं नभ[:]-स्पृशन्निव[2] मनोहरैः शिखरैः । शशि-भान्वोरभ्युदयेष्वमल-मयूखायतन-

२१. भूतं[3] ।।[३८*] वत्सर-शतेषु पंचसु विंशत्यधिकेषु नवसु चाब्देषु । यातेष्वभिरम्य-तपस्य-मास-शुक्ल-द्वितीयायां[4] ।।[३९*] स्पष्टै-रशोकतरु-केतक-सिंदुवार-लोलातिमुक्तकलता-मदयंतिकानां[5] । पुष्पोद्गमैरभिनवैरधिगम्य नूनमैक्यं विजृंभित-शरे हर-पूत-देहे[6] ।। [४०*]

२२. मधु-पान-मुदित-मधुकर-कुलपगीत-नगने (णै) क-पृथु-शाखे । काले नवकुसुमोद्गम-दंतुर-कांत-प्रचुर-रोद्ध्रे ।।[४१*] शशिनेव नभो विमलं कौ[स्तु]भ-मणिनेव शर्ङ्गिणो वक्षः । भवन-वरेण तथेदं पुरमखिलमलंकृतमुदारं[7] ।। [४२*] अ-मलिन-शशि-

---

१. गृहम् पढ़ें ।
२. फ्लीट का संशोधन : स्पृशतीव, सरकार : स्पृशन्निव ।
३. भूतम् पढ़ें ।
४. °याम् पढ़ें ।
५. फ्लीट : मदयन्तिकानां । °नाम् पढ़ें ।
६. फ्लीट का संशोधन : °धूतदेहे ।
७. °दारम् पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२३. लेखा-दंतुरं पिङ्गलानां परिवहति समूहं यावदीशो जटानां[१]।
विकच[२]-कमल-मालामंस-सक्तां च शार्ङ्गी भवनमिदमुदारं
शाश्वतन्तावदस्तु ॥[४३*] श्रेण्यादेशेन भक्त्या च कारितं भवनं
रवेः। पूर्व्वा चेयं प्रयत्नेन रचिता वत्सभट्टिना ॥[४४*]
२४, स्वस्ति कर्तृ-लेखक-वाचक-श्रोतृभ्यः ॥ सिद्धिरस्तु ॥

---

१. °नाम् पढ़ें।
२. फ्लीट : विकट।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारगुप्त (द्वितीय) का भिटारी मुद्रा लेख

स्थान : उत्तर प्रदेश के गाजीपुर जिले में भिटारी ग्राम में एक भवन की नींव खोदते समय प्राप्त मुद्रा पर उत्कीर्ण ।

लिपि : पाँचवीं-छठी शताब्दी की उत्तरी ब्राह्मी ।

भाषा : संस्कृत ।

विषय : कुमारगुप्त (द्वितीय) तक गुप्त वंशावली ।

संदर्भ : वी. ए. स्मिथ, JBAS, 58, pt. I, PP. 84 ff; हॉर्नले, JASB, 58, pt. I, pp. 89; ff. फ्लीट, IA, 19, 1890, pp. 224 ff.; सरकार, SI, p.329.

१. [सर्व्व]-राज़ोच्छेत्तु ⌒ पृथिव्यामप्रतिरथस्य महाराज-श्री-[गुप्त]-प्रपौ[त्र]स्य महाराज-श्री-घटोत्कच-पौत्रस्य म[हा]-

२. [राजा]धिर[ा]ज-श्री-चन्द्रगुप्त-पुत्रस्य लिच्छ[वि-दौत्रह स्यि] म[हादे]व्य[ां कुमा]रदेव्यामुत्पन्नस्य महाराजाधिराज-

३. [श्री]-समुद्रगुप्तस्य पुत्रस्तत्परि[सृही]तो म[हादेव्मान्दत्तदेव्या]-मुत्पन्नस्स्वयं च[ा]प्रतिरथ[1] ⌒ परम-भाग-

४. [वतो महाराजा]धिराज-श्री-चन्द्रगुप्तस्तस्य [पुत्र]स्तत्पाद[ा]नु-[द्ध्या]तो महादेव्य[ां ध्रु]वदेव्यामुत्पन्नो [महारा]-

५. [जाधि]राज-श्री-कुमार[गुप्त]स्तस्य पुत्रस्तत्पादानुद्ध्या[तो] महादेव्यामनन्तदेव्य[ा[मुत्पन्नो महा[रा]-

---

१. हॉर्नले : च प्रति॰ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. [जाधिरा]ज-श्री-[पुरुगुप्त][1]स्तस्य पुत्रस्तत्पादानुद्धय[ातो]
महादे[व्यां] श्री[2]-चन्द्रदेव्यामुत्प[न्नो] म[हा]-

७. [राजाधिरा]ज-श्री-नरसिंहगुप्तस्तस्य[पु]त्रस्त[त्प]ादा[नुद्धयातो]
मह[ादेव्यां]श्री-म[न्मित्र][3]-

८. [देव्या]मु[त्प]न्न ⌣ परमभ[ा]गवतो मह]ाराजाधिराज[-श्री-
कुम[ा]र[गुप्तः॥]

---

१. आरम्भ में पुरगुप्त पढ़ा गया था।
२. फ्लीट : श्रीवत्स°।
३. वही : महालक्ष्मी°।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वैण्यगुप्त का गुणैधर ताम्र-पट्ट अभिलेख

गुप्त संवत् १८८

स्थान : बंगलादेश के तिपरा जिले के कोमिल्ला नगर से लगभग ३० किलोमीटर पश्चिमोत्तर को गुणैधर ग्राम के तालाब से उपलब्ध ताम्रपट्ट पर उत्कीर्ण।

लिपि : गुप्तकालीन ब्राह्मी का पूर्वी रूप।

भाषा : संस्कृत।

विषय। महाराज वैण्यगुप्त द्वारा महायान सम्प्रदाय के वैवर्तिक संघ को भूमिदान।

सन्दर्भ : दिनेशचन्द्र भट्टाचार्य, IHQ, 6, pp. 45-60; मनमोहन घोष, IHQ, 6, p. 561; सरकार, SI, p. 340.

(प्रथम ओर)

१. स्वस्ति [।।*]महानौ-हस्त्यश्व-जयस्कन्धावारात्क्रीपुराद्भगवन्महा-
देव-पादानुद्ध्यातो महाराज-श्री-वैन्यगुप्तः[1]

२. कुशली [ब्राह्मणादीन्कुटुम्बिनः][2] स्व-पादोपजीविनश्च कुशल-
माशंस्य समाज्ञापयति [।*] विदितं भवतामस्तु यथा

३. मया माता-पित्रोरात्मनश्च पु[ण्या]भिवृ[द्ध]ये[ऽ*]-स्मत्पाद-दास-
महाराज-रुद्रदत्त-विज्ञाप्यादनेनैव माहायानिक-शाक्यभिक्ष्वा-

४. चार्य-शान्तिदेवमुद्दिश्य गोप·············[दिग्भागे] कार्य्यमाण-
कार्य्यावलोकितेश्वराश्रम-विहारे अनेनै-

५. वाचार्य्येण प्रतिपादित[क]माहायानिक-वैवर्त्तिक[3]-भिक्षु-संघ[ा*]
नाम्परिग्रहे भगवतो बुद्धस्य सततं त्रिष्कालं (त्रिकालं)

---

१. वैण्य पढ़ें।

२. सरकार का दूसरा सुझाव—समवेतान्कुटुम्बिनः।

३. महायानिकावैवर्त्तिक भी सुझाव दिया गया है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. गन्ध-पुष्प-दीप-धूपादि-प्र[वर्त्तनाय*][त*]स्य भिक्षु-संघस्य चीवर-
पिण्डपात-शयनासन-ग्लानप्रत्यय-भैषज्यादि-

७. परिभोगाय विहारे [च] खण्ड-फुट्ट[1]-प्रतिसंस्कार-करणाय उत्तर-
माण्डलिक-कान्तेडदक-ग्रामे सर्वतो भो-

८. गेनाग्रहारत्वेनैकादश-खिल-पाटकाः पञ्चभिः खण्डैस्ताम्र-
पट्टेनातिसृष्टाः [।*] अपि च खलु श्रुति-स्मृती-

९. [ति*]हा[स]-विहितां[2] पुण्य-भूमिदान-श्रुतिमैहिकामुत्त्रिक-फल-
विशेषे[ण*] स्मृतो(तौ)[3] भावतः समुपगम्य स्वतस्तु पी-

१०. डामप्यूरीकृत्य पात्त्रेभ्यो भूमिं [नापहरेत् बाधाञ्च न कुर्य्यात्][4]
[।*] द्विष(?)द्भिरस्मद्वचन-गौरवात्स्व-यशो-धर्म्मावाप्तये चैते

११. पाटका अस्मिन्विहारे शश्वत्कालमभ्य[नुपालयितव्याः[5][।।] अनु-
पालनम्प्रति च भगवता पराशरात्सजेन वेदव्या-

१२. सेन व्यासेन गीताः श्लोका भवन्ति [।*] षष्टिं वर्ष-स[हस्रा]णि
स्वर्ग्गे मोदति भूमिदः [।*] आक्षेप्ता चानुमन्ता च ता-

१३. न्येव न[र*]के वसेत् [।।१*] स्व-दत्तां पर-दत्ताम्वा(त्तां वा) यो
हरेत [वसु]न्धरां[6][।*] [स] विष्ठायां क्रिमिर्भूत्वा पितृभिः सह
पच्यते [।।२*]

---

१. संस्कृत 'स्फुटित' का प्राकृत रूप।
२. भट्टाचार्य : हापविहिता।
३. कुछ विद्वान 'स्मृतां' सुझाते हैं।
४. सरकार का अनुमान।
५. भट्टाचार्य : °भ्यनुमन्तव्याः।
६. °राम् पढ़ें।

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४. पूर्व-दत्तां द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर [।*] महीं महीमतां श्रेष्ठ दानाच्श्रेयो[1][ऽ*]नुपालनं[2] [॥३*] वर्त्तमानाष्टाशीत्यु (त्यु)-

१५. त्तर-शत-संवत्सरे पौष-मासस्य चतुर्व्विन्श(र्व्विंश)तितम-दिवसे दूतकेन महाप्रतीहार-महापीलुपति-पञ्चाधि-

१६. करणोपरिक-पाट्युपरिक-[पुर][3]पुरपालोपरिक-महाराज-श्री-महासामन्त-विजयसेनेनैतदेकादश-पाटक-दा-

१७. नायाज्ञामनुभाविता: कुमारामात्य-रेवज्स्जवामी भामह-वत्स-भोगिका:(कौ) [च*] [॥*] लिखितं सन्धिविग्रहारि(ध)करण-काय-

१८. स्थ-नरदत्तेन [॥*] यत्रैक-क्षेत्र-खण्डे नव-द्रोणवापाधिक-सप्त-पाटक-परिमाणे सीमा-लिङ्गानि [।*] पूर्व्वेण गुणेका-

१९. ग्रहार-ग्राम-सीमा विष्णुवर्धकि-क्षेत्रश्च(ञ्च) [।*] दक्षिणेन मिदुविलाल(?)-क्षेत्रं राज-विहार-क्षेत्रञ्च [।*] पश्चिमेन सूरी-नाशी-रम्पूर्ण्णक-

२०. क्षेत्रं[4] [।*] उत्तरेण दोषी-भोग-पुष्करि[णी]................. [ए*]वम्पियाकादित्य-व(ब)न्धु-क्षेत्राणाञ्च सीमा [॥*]

२१. द्वितीय-खण्डस्याष्टाविन्श(विंश)ति-द्रोणवाप-परिमाणस्य सीमा [।*] पूर्व्वेण गुणिकाग्रहार-ग्राम-सीमा [।*] दक्षिणेन पक्क-

---

१. दानाच्छ्रेयो पढ़ें।

२. °नम् पढ़ें।

३. भूल से 'पुर' दो बार उत्कीर्ण हो गया लगता है।

४. यहाँ और आगे वाक्यान्त क्षेत्रं को क्षेत्रम् पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२२. विलाल(?)-क्षेत्रं[।*] पश्चिमेन राजविहार-क्षेत्रं [।*] उत्तरेण वैद्य(?)-क्षेत्रं [।।*] तृतीय-खण्डस्य त्रयोविन्श(विंश)ति-द्रोण-वाप-

२३. परिमाणस्य सीमा [।*] पूर्व्वेण..........क्षेत्रं [।*] दक्षिणेन नखद्दार्च्चरिक (?)-क्षेत्र-सीमा [।*] पश्चिमेन

(दूसरी ओर)

२४. ज(जो ?)लारी-क्षेत्रं [।*] उत्तरेण नागी-जोडाक-क्षेत्रं [।।*] चतुर्थस्य त्रिंशद्द्रोणवाप-परिमाण-क्षेत्र-खण्डस्य सीमा [।*] पूर्व्वेण

२५. बुद्धाक-क्षेत्र-सीमा [।*] दक्षिणोन कालाक-क्षेत्रं [।*] पचिमेन [सू]र्य्य-क्षेत्र-सीमा [।*] उत्तरेण महीपाल-क्षेत्रं [।।*] [प]ञ्च-मस्य

२६. पादोन-पाटक-द्वय-परिमाण-क्षेत्र-खण्डस्य सीमा [।*] पूर्व्वेण खण्ड-वि[डु]ग्गुरिक-क्षेत्रं [।*] दक्षिणेन मणिभद्र-

२७. क्षेत्रं[।*] पश्चिमेन यज्ञरात-क्षेत्र-सीमा [।*] उत्तरेण नादडक-ग्राम-सीमेति [।।*] विहार-तल-भूमेरपि सीमा-लिङ्गानि [।*]

२८. पूर्व्वेण चूडामणिनगर-श्रीनौयोगयोर्म्मद्ध्ये[१] जोला [।*] दक्षि-णेन गणेश्वर-विलाल-पुष्करिण्या नौ-खातः [।*]

२९. पश्चिमेन प्रद्युम्नेश्वर-देवकुल-क्षेत्र-प्रान्तः [।*] उत्तरेण प्रडामार-नौयोग-खातः [।।*[एतद्विहार-प्रावेश्य-शून्य-प्रतिकर-

---

१. दो स्थानों के नाम चूड़ामणिनगर तथा श्रीनौयोग अथवा चूड़ामणि तथा नगरश्री हैं। बाद के विकल्प में नौयोग का अर्थ 'नौका ठहराने का स्थान' ग्रहण करना चाहिए।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३०. हज्जिक-खिल-भूमेरपि सीमा-लिङ्गानि [।*] पूर्व्वेण प्रद्यु-म्नेश्वर-देवकुल-क्षेत्र-सीमा [।*] दक्षिणेन शाक्य-भिक्ष्वाचार्य्य-जित-

३१. सेन-वैहारिक-क्षेत्रावसानः[1] [।*] पश्चिमेन ह(?) चात-गंग उत्तरेण दण्डपुष्किणी[2] चेति ॥ सं १० ८० ८ पोष्ष[3]-दि २० ४[।।*]

---

१. °नम् पढ़ें।

२. पुष्करिणी पढ़ें।

३. पौष पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गोपराज का एरण स्तम्भ अभिलेख

गुप्त संवत् १९१

स्थान : मध्य प्रदेश के सागर जिले में एरण ग्राम के पास बीना नदी के तट के निकट स्थित स्तम्भ।

लिपि : उत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : गुप्त सम्राट् भानुगुप्त के सामन्त (?) गोपराज का युद्ध में मारा जाना।

संदर्भ : फ्लीट, CII, III, No. 20; सरकार, SI, p. 345.

१. ओम् [।*] संवत्सर-शते एकनवत्युत्तरे श्रावण-बहुल-पक्ष-स[प्त]म्य[ां]

२. संवत् १०० ९० १ श्रावण ब दि ७ ।। [*]ल(?)क्ष-वङ्शा (वंशा)दुत्पन्नो [— —]

३. राजेति विश्रुतः [।*]तस्य पुत्रो [ऽ*]तिविक्रान्तो नाम्ना राजा-(ऽ*)थ माधवः ।।[१*] गोपराज[:]

४. सुतस्तस्य श्रीमान्विख्यात-पौरुषः [।*] शरभराज-दौहित्रः स्व-वङ्श[वंश]तिलको [ऽ*]घु ना (?) [।।२*]

५. श्री भानुगुप्तो जगति प्रवीरो राजा महान्पार्थ-समो [ऽ*]तिशूरः[।] तेनाथ सार्द्धन्त्विह गोपरा[जो]

६. मित्त्रानुगत्येन किलानुयातः ।।[३*] कृत्वा [च*] [यु]द्धं समुहत्प्रक[ा]शं स्वर्ग्गं गतो दिव्य-नरे[न्द्र-कल्पः] [।*]

७. भक्ता[ऽ*]नुरक्ता च प्रिया च कान्ता भ[ार्यावि]ल[ग्न]ा-नुगगता[ऽ*]ग्नि-र[ा]शिम् ।।[४*]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रभावतीगुप्ता का पूना ताम्र-पट्ट अभिलेख

शासन वर्ष १३

स्थान : महाराष्ट्र के पूना नगर में एक ताम्रशिल्पी से प्राप्त दो ताम्र-पट्टों पर उत्कीर्ण। यह शिल्पी मूलतः अहमदनगर निवासी था। संभवतः ये ताम्र-पट्ट इसकी पीढ़ियों से सुरक्षित थे।

लिपि : कीलाक्षर दक्षिणी ब्राह्मी। इसमें उत्तरी ब्राह्मी की भी कुछ विशेषताएं हैं।

भाषा : संस्कृत।

विषय : वाकाटक महाराज रुद्रसेन (द्वितीय) की अग्रमहिषी युवराज दिवाकर-सेन की माता प्रभावतीगुप्ता द्वारा आचार्य चनालस्वामी को उङ्गुण ग्राम का दान। प्रभावतीगुप्ता ने इस वाकाटक अभिलेख में केवल पितृकुल की वंशावली दी है।

संदर्भ : पाठक तथा दीक्षित, EI, 15, p. 41; सरकार, SI, p. 435; पाण्डेय, HLI, p. 113.

(मुद्रा)

वाकाटकललामस्य
[क्र]मप्राप्तनृपश्रिय[: ।*]
जनन्या युवराजस्य
शासनं रिपुशासनं[1] [।।*]

(प्रथम पट्ट)

१. सिद्धम् [।।*] दृष्टम्[2][।*] जितं भगवता [।*] स्वस्ति नन्दिवर्द्धनादा-सीद्गुप्तादिराजो मह [राज]-

---

१. 'नम्' पढ़ें।

२. पंक्ति २-३ के सामने प्रान्त में उत्कीर्ण।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२. श्री-घटोत्कचस्तस्य सत्पुत्रो महाराज-श्री-चन्द्रगुप्तस्तस्य सत्पुत्रो

३. [ऽ*]नेकाश्वमेध-याजी लिच्छवि-दो(दौ)हित्रौ(त्रो) महादेव्यां कुमारदेव्यामुत्पन्नो

४. महाराजाधिराज-श्री-समुद्रगुप्तस्तत्प(त्स)त्पुत्रस्तत्पाद-परिगृहीतः

५. पृथिव्यामप्रतिरथस्सर्वराजोछे(च्छे)त्ता चतुरुदधि-सलिलास्वादित-

६. यशा [अ*]नेक-गो-हिरण्य-कोटी[1]-सहस्र-प्रदः परम-भागवतो महारा-

७. जाधिराज-श्री-चन्द्रगुप्तस्तस्य दुहिता धारण-सगोत्रा नागकुल-सम्भू-

८. ताया[ं*] श्री महादेव्या[ं*] कुबेरनागायामुत्पन्नोभय-कुलालङ्कार-भूता[ऽ*]त्यन्त-भगवद्भक्ता

९. वाकाटकानां महाराज-श्री-रुद्रसेनस्याग्र-महिषी युवराज-

१०. श्री-दिवाकरसेन-जननी श्री-प्रभावति(ती)-गुप्ता सुप्रतिष्ठाहारे

(द्वितीय पट्ट)

११. विलवणकस्य पूर्व-पार्श्वे शीर्ष-ग्रामस्य दक्षिण-पार्श्वे कदापिञ्ज-नस्यापर-पार्श्वे

१२. सिदिविवरकस्योत्तर-पार्श्वे उङ्गुण[2]-ग्रामे ब्राह्मणाद्यान्ग्राम-कुटुम्बिन × कुशल-

१३. मुक्त्वा समाज्ञापयति[।*]विदितमस्तु वो यथैष ग्रामो[ऽ*]स्माभि[ः*] स्व-पुण्याप्यायना[र्थं]

१४. कार्त्तिक-शुक्ल-द्वादश्या [ं*] भगवत्पाद-मूले निवेद्य भगवद्भक्ता-चार्य-चनालस्वामिने[ऽ*]पूर्व्व-

---

१. कोटि पढ़ें ।

२. पाठक तथा दीक्षित : दङ्गुण ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१५. दत्त्या उदक-पूर्व्वमतिसृष्टो[1] यतो भवा(व)द्भिरुचित-मर्य्यादया सर्व्वाज्ञा॒कर्त्तव्या[:*] पूर्व्व-

१६. राज्जा(जा)नुम[तां]श्चात्र चातुर्विद्याग्रहारपरोहारान्वितराम-स्तद्यथा[ऽ*]भट-छ(च्छा)त्र-प्रावेश्यः

१७. अ-चारासन-चर्म्माङ्गार-क्लिण्व-क्रोणि-खानकः अ-पा[र*]म्पर[:*] अ-पशु-मेध्यः अ-पुष्प-क्षीर-सन्दोहः

१८. सनिधिस्सोपनिधिस्सक्ल(क्लृ)प्तोपक्ल(क्लृ)प्तः [।*] न(त)-देष भविष्यद्राजि(ज)भिस्संरक्षितव्य[:*] परिवर्द्ध-

१९. यितव्यश्च [।*] यश्चास्मच्छासनमगणयमानस्स्वल्पामप्यत्राबाधां कुर्य्यात्कारयी(ये)त वा

२०. तस्य ब्राह्मण(णै)रावेदितस्य सदण्ड-निग्रहं कुर्य्याम [।*] व्यास-गि(गी)तश्चात्र श्लोको भवति [।*]

२१. स्व-दत्तां पर-दत्तां[*]वा यो हरेत वसुन्धरां[2] [।*] गवां [*]शत-सहस्रस्य हन्तुर्हरति दुष्कृतम् [।।*] [२*]

२२. संवत्सरे च त्रयोदशमे[3] लिखितमिद[ं*] शासनम् [।*] चक्रदा-सेनोत्कट्टितम्[4] [।।]

---

१. °सृष्टः। यतो पाठ अच्छा है।

२. °राम् पढ़ें।

३, त्रयोदशे पढ़ें।

४. °नोट्टङ्कितम् पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रभावतीगुप्ता का रिथपुर ताम्र-पट्ट अभिलेख

शासन वर्ष १९

७. मातंग[३]-शैलः। भीमः श्रीशानवर्म्म-क्षितिपति-शशिनः सैन्य-
दुग्धोद-सिन्धुर्ल्लक्ष्मी-संप्राप्ति-हेतुः सपदि विमथितो मन्दरीभूय
येन ॥[८*] शौर्य-सत्य-व्रत-धरो यः प्रयाग-गतो व-[४]

८. ने। अम्भसीव करीषाग्नौ मग्नः स पुष्प-पूजितः ॥[९*]श्री-
दामोदरगुप्तो[ऽ*]भूत्तनयस्तस्य भूपतेः। येन दामोदरेणेव दैत्या
इव हता द्विषः ॥[१०*] यो मौखरेः समितिषूद्ध-

---

१. पातम् पढ़ें।
२. शिशिर पढ़ें। मूल को फ्लीट ने शेसेर पढ़ा है।
३. मातङ्ग पाठ अच्छा है।
४. फ्लीट : ध।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

९. त-हूण-सैन्या वल्गद्घटा विघटयन्नुरु-वारणानां[१]। संमूर्च्छितः सुर-वधु(ध)र्वरयं(यन्) ममेति तत्पाण[२]-पङ्कज-सुख-स्पर्शाद्विवु-(बु)द्धः ।।[११*] गुणव[द्*]-द्विज-कन्याना[ं*]नानालंकार-यौवन-

१०. वतीनां[३]। परिणायितवान्स नृपः शतं निसृष्टाग्रहाराणां[४] ।।[१२*] [श्री]महासेनगुप्तो [ऽ*]भूत्तस्माद्वीराग्रणी[:*] सुतः। सर्व्व-वीर-समाजेषु लेभे यो धुरि वीरता[ं*] [।।१३*] श्र[ी] मत्सुस्थितवर्म्म-युद्ध-विजय-

११. श्लाघा-पदाङ्कं मुहुर्यस्याद्यापि विवु(बु)द्ध-कुन्द-कुमुद-क्षुण्णा-च्छहारा[ायि]त[ं*]। लौहित्यस्य त[टे]षु[५] [शी]तल-त[ले]-षूत्फुल्लनाग-द्रुमच्छाया-सुप्त-विवु(बु)द्ध-[सि]द्ध-[मि]थुनैः स्फीतं यशो गीयते ।।[१४*]वसुदेवा-

१२. दिव तस्माच्छ्री-सेवन-[शो? भो]दित-चरण-युगः। श्री-माधव-गुप्तो[ऽ*]भून्माधव इव विक्रमैक-रस[:।।] [१५*] [———⏑⏑] नुस्मृतो धुरि रणे श्लाघवतामग्रणीः सो(सौ)जन्यस्य निधानमर्थ-निध(च)-

१३. य-त्यागो[द्*]धुराणां वर[६][:]। लक्ष्म[ी]-स[त्य-स]रस्वती-कुल-गृ[हं] धर्म्मस्य[७] सेतुर्दृढः पूज्यो ना[स्ति] स [भू]-तले [⏑⏑ ⏑———⏑]ल[:?] सद्गुणैः ।।[१६*] च[क्रं] पाणि-तलेन सो[ऽ*]प्युदवहत्तस्यापि शार्ङ्ग[ं*]धनु-

---

१. नाम् पढ़ें।
२. पाणि पढ़ें।
३. नाम् पढ़ें।
४. णाम् पढ़ें।
५. 'ट' स्पष्ट है। केवल 'ए' की मात्रा दिखाई नहीं देती।
६. फ्लीट 'धरः' पढ़कर 'वरः' संशोधन करते हैं।
७. फ्लीट : धर्मस्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४. नाशायासुहृदा[*]सुखाय सुहृदां तस्याप्यसिर्नन्दकः । प्राप्ते विद्विषतां वधे प्रतिह[तं?]तेनाप[--⌣-----⌣⌣-⌣-] ढ(?)रि(?)म(?) [--]न्याः प्रणेमुर्ज्जनाः [॥१७*] आजौ मया विनिहितां व(ब)-

१५. लिनो द्विष[न्तः] कृ[त्यं] न म(मे)[ऽ*]स्त्यपरमित्यवधार्य वीरः [।] श्री-हर्षदेव-निजसंगम-वाञ्छया च (?) [--⌣-⌣⌣⌣-⌣⌣---⌣--॥] [१८*] श्रीमन्व(न्ब)भूव दलितारि-करीन्द्र-कुम्भ-मुक्ता-रजः[1]

१६. पटल-पांसुल-मण्डलाग्रः । आदित्यसेन इति तत्तनयः क्षितीश-चूडाम[णि]र्द्द [⌣⌣-⌣⌣-⌣--॥] [१९*] [---⌣⌣-⌣] मागतमरिध्वंसोत्थमाप्तं यशः श्लाघ्यं

१७. सर्व्वधनुष्मतां पुर इति श्लाघां परा बिभ्रति[2] । आशीर्व्वाद-परं-परा चि(?)र-सक्त(?)द्[--⌣--⌣-- ---⌣⌣-⌣-⌣⌣⌣---⌣] यामासम (?) ॥[२०*] आजो स्वेद-च्छलेन ध्व-

१८. ज-पट-शिखया मार्ज्जतो दान-पङ्कं खङ्गं क्षुण्णेन मुक्ता-शकल-सिकत[ली]कृ(?)त्य(?) [--⌣-- ----⌣--⌣⌣⌣⌣⌣⌣-] मत(त्त)-मा[तं]ग-घातं तद्गन्धाकृष्त[3] सर्प्पद्व(द्ब)-

१९. हल-परिमल-भ्रात्त(न्त)-मत्तालि-जालं[4] ॥[२१*]आव(ब)द्ध-भीम-विकट-भ्रुकुटी-कठोर-संगा(ग्रा)म [-⌣⌣⌣-⌣⌣--⌣--।--⌣-⌣⌣]व-वल्लभ-भृत्य-वर्ग्ग-गोष्ठीषु पेश-

---

१. 'र' के आगे एक अनावश्यक बिन्दु उत्कीर्ण है ।

२. बिभ्रति पढ़ें ।

३- कृष्ट पढ़ें । फ्लीट ने मूल को ही कृष्ट पढ़ा है ।

४. जालम् पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२०. लतया परिहास-शीलः ॥[२२*] सत्य-भर्त्तृ-व्रता यस्य मुखोप-
ध[ा]न-तापसी । प[रि]हास [–⌣––––––––––⌣–⌣–॥]
[२३*] [––––⌣–]ज्ञः सकलरिपु-व(ब)ल-ध्वंस-हेतुर्ग्गरी-

२१. यान्निर्स्त्रिशोत्खात-घात-श्रम-जनित-जडो[ऽ*]प्यूर्ज्जित-स्व-प्रतापः।
युद्धे मत्तेभ-कुम्भ-स्थ[ल⌣⌣⌣⌣––⌣– - ⌣ - - - -]
[श्वे]तातपत्र-स्थगित-वसुमती-मण्डलो लो-[1]

२२. क-पालः ॥[२४*] आजौ मत्त-गजेन्द्र-कुम्भ-दलन-स्फीत-स्फुरद्दो-
र्युगो ध्वस्तानेकरिपुप्रभाव-[व⌣---]यशोमण्डलः । न्यस्ताशेष-
नरेन्द्र-मौलि-चरण-स्फार-प्रतापान-

२३. लो लक्ष्मीवान्समराभिमान-विमल-प्रख्यात-कीर्त्तिर्नृपः ॥[२५*]
येनेयं शरदिन्दु-विम्ब[2]-धवला प्रख्यात-भूमण्डला लक्ष्मी-संगम-
कांक्षया सुमहती कीर्त्तिश्चरं कोपिता । याता सा-

२४. गर-पारमद्भुततमा सापत्न्य-वैरादहो तेनेदं[3] भवनोत्तमं क्षिति-
भुजा विष्णोः कृते कारितं[4]॥ [२६*] तज्जनन्या महादेव्या
श्रीमत्या कारितो मठः । धार्मिकेभ्यः[5] स्वयं दत्तः सुरलो-

२५. क-गृहोपमः ॥[२७*]शंखेन्द-स्फटिक-प्रभा-प्रतिसम-स्फार-स्फुर-
च्छीकरं नक्र-क्रान्ति-चलत्तरङ्गविलसत्पक्षि-प्रनृत्यत्तिमि । राज्या
खानितमद्भुतं सुतपसा पेपीयमानं

२६. जनैस्तस्यैव प्रिय-भार्यया नरपतेः श्री-कोणदेव्या सरः ॥ [२८*]

---

१. यहाँ एक पड़ी रेखा अनावश्यक है ।
२. बिम्ब पढ़ें ।
३. 'ने' और 'दं' के बीच अनावश्यक बिन्दु ।
४. तम् पढ़ें ।
५. पलीट : केभ्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यावच्चन्द्र-कला हरस्य शिरसि श्रीः शार्ङ्गिणो वक्षसि व्र(ब्र)-ह्मास्ये च सरस्वती कृत-

२७. [⏑ - - - ⏑ - - ⏑ -] । [भोगे] भूभुजगाधिपस्य च तडिद्या-वद्घनस्योदरे तावत्कीर्तिमिहातनोति धवलामादित्यसेनो नृपः ।।[२९*] सूक्ष्मशिवेन गौडेन प्रशास्तिर्व्विकटाक्षरा ।। (।)

२८. [- - -] मा मिता सम्यग्धार्मिकेण सुधीमता ।। [३०*]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धरसेन (द्वितीय) का मालिया ताम्र-पट्ट अभिलेख

गुप्त-वलभी संवत् २५२

स्थान : गुजरात के जूनागढ़ नगर से ३७ किलोमीटर दक्षिण-पश्चिम में मालिया नगर से प्राप्त दो ताम्र-पट्टों पर उत्कीर्ण ।

लिपि : छठी शताब्दी ईसवी की सौराष्ट्र अथवा काठियावाड़ की प्रतिनिधि लिपि, दक्षिणी ब्राह्मी ।

भाषा : संस्कृत ।

विषय : मैत्रक कुल के राजा धरसेन (द्वितीय) द्वारा ब्राह्मण रुद्रभूति को पञ्चमहायज्ञ के लिए अन्तरत्रा, डोम्भिग्राम तथा वज्रग्राम नामक तीन ग्रामों में भूमिदान ।

संदर्भ : फ्लीट, CII, III, No. 38.

(प्रथम पट्ट)

१. ॐ स्वस्ति वलभीतः प्रसभ-प्रणतामित्राणां मैत्रकाणामतुल-बल-सपत्न[1]-मण्डलाभोग-संसक्त-संप्रहार-शत-लब्ध-प्रतापः

२. प्रतापोपनत-दान-मानार्ज्जवोपार्ज्जितानुरागानुरक्त-मौलभृत-मित्र-श्रेणी-बलावाप्त-राज्य-श्रीः परम-माहेश्वरः श्री-सेनापति-

३. भटार्क्कः [।।*] तस्य सुतस्तत्पाद-रजो[ऽ*]रुणावनत-पवित्रीकृत-शिराः शिरोवनत-शत्रु-चूडामणि-प्रभा-विच्छुरित-पाद-नख-पङ्क्तिदीधितिर्द्दी-

४. नानाथ-कृपण-जनोपजीव्यमान-विभवः परममाहेश्वरः श्री-सेना-पति-धरसेनस्तस्यानुजस्तत्पाद-प्रणाम-प्रशस्ततर-विमल-

---

१. फ्लीट : संपन्न ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५. [मौलि*][१]-मणिर्म्मन्वादि-प्रणीत-विधि-विधान-धर्म्मा धर्म्मराज इव विहित-विनय-व्यवस्था-पद्धतिरखिल-भुवन-मण्डलाभोगैक-स्वामिना-परम-स्वामिना

६. स्वयमुपहित-राज्याभिषेकः महा-विश्राणनावपूत-राज्य-श्रीः परम-माहेश्वरो महाराज-द्रोणसिंहः सिंह इव [॥*] तस्यानुजः स्व-भुज-

७. वल-पराक्रमेण पर-गज-घटानीकानामेक-विजयी शरणैषिणां शरणमववोध्धा[२] शास्त्रार्थ-तत्वा(त्त्वा)नां कल्पतरुरिव सुहृत्प्र-

८. णयिनां यथाभिलषित-काम-फलोपभोगदः परमभागवतः श्री-महाराज-ध्रुवसेनस्तस्यानुजस्तच्चरणारविन्द-प्रणति-प्र-

९. विधौताशेष-कल्मषः सुविशुद्ध-व्य(स्व)-चरितोदक-प्रक्षालित-सकल-कलि-कलङ्कः प्रसभ-निर्ज्जितारा‍ति-पक्ष-प्रथित-महिमा

१०. परमादित्य-भक्तः श्री-महाराज-धरपट्टस्तस्यात्मजस्तत्पाद-सपर्य्यावाप्त-पुण्योदय[:*] शैशवात्प्रभृति-खड्ग-द्वितीय-बाहुरे-

११. व समद-पर-गज-घटा-[ऽऽ*]स्फोटन-प्रकाशित-सत्व(त्त्व)-निकषः तत्प्रभाव[३]-प्रणतारा‍ति-चूडारत्न-प्रभा-संसक्त-सख्य(व्य)-पा-

१२. द-नख-रश्मि-संहति[:*] सकल-स्मृति-प्रणीत-मार्ग्ग-सम्यक्परि-पालन-प्रजा-हृदय-रञ्जनादन्वर्थ-राज-शब्दो रूप-कान्ति-स्थैर्य्य-

१३. गाम्भीर्य्य-बुद्धि-संपद्भिः स्मर-शशाङ्कार्द्रि(द्र)राजोदधि-त्रिदश-गुरु-धने[शा*]नतिशयाना(नो)[ऽ*]भय-प्रदान-परतया तृण-व-

---

१. धरसेन (द्वितीय) के भर ताम्र-पट्ट अभिलेख में यह पाठ मिलता है। उसी के आधार पर यह यहाँ जोड़ा गया है।

२. °वबोद्धा पढ़ें।

३. यहां त् के विषय में फ्लीट की शङ्का निराधार है। वास्तव में त् सयुक्त अक्षर 'त्प्र' में उचित स्थान पर उत्कीर्ण है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४. दपास्त[ा*]शेष-स्व-कार्य्य-फल: पादचारीव सकल-भुवन-मण्डला-
भोग-प्रमोद: परममाहेश्वर: श्री-महारा-

१५. ज-गुहसेन: [।।*] तस्य सुतस्तत्पाद-नख-मयूख-संतान-निर्वृत्त-
जाह्नवी-जलो(लौ)घ-विक्षालिताशेष-कल्मष: प्रणयि-शत-

१६. सहस्रोपजीव्य-भोग-संपत् रूप-लोभादिवाश्रृ(श्रि)तस्सरसमा-
भिगामिकैर्गुणै[:*] सहज-शक्ति-शिक्षा-विशेष-विस्मा-

१७. पिताखिल-धनुर्द्धर: प्रथम-नरपति-समतिसृष्टानामनुपालयिता
धर्म्म्य-दायानामपाकर्त्ता

१८. प्रजोपघात-कारिणामुपप्लवानां दर्शयिता श्री-सरस्वत्योरेकाधि-
वासस्य संहताराति-

(द्वितीय पट्ट)

१९. पक्ष-लक्ष्मी-परिक्षोभ[1]-दक्ष-विक्रम: क्रमोपसंप्राप्त विमल-पार्थिव-
श्री: परममाहेश्वर: महाराज-

२०. श्रि(श्री)-धरसेन: कुशली सर्व्वानेवायुक्तक-विनियुक्तक-द्राङ्गिक-
महत्तर-चाट-भट-ध्रुवाधिकरणिक-दाण्डपाशिक-

२१. राजस्थानीय-कुमारामात्यादीनन्यांश्च यथा-संबध्यमानकान्
समाज्ञापयत्यस्तु व: संविदितं यथा मया माता-

२२. पित्रो: पुण्याप्यायनायात्मनश्चैहिकामुष्मिक-यथाभिलषित-फला-
वाप्तये अन्तरत्रायां शिवक-पद्रके वीरसेन-

२३. दन्तिक-प्रत्यय-पादावर्त्त-शतं एतस्मादपरत: पादावर्त्ता—पञ्च-
दश तथा अपर-सीम्नि स्कम्भसेन-प्रत्यय-पादावर्त्त-शतं विंशा-
धिकं

२४. पूर्व्व-सीम्नि पादावर्त्ता दश डोम्भिग्रामे पूर्व्व-सीम्नि वर्द्धकि-
प्रत्यय-पादावर्त्ता नवति[:*] वज्रगामे[ऽ*]पर-सीम्नि ग्राम-
शिखर-पादावर्त्त-शतं

---

१. कई अन्य वलभी अभिलेखों में 'परिभोग' पाठ है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२५. शीव्यि[1](?)दिन्न-महत्तर-प्रत्यया अष्टाविङ्शति-पादावर्त्त सरा वापी । भुम्भुस-पद्रके कुटुम्वि(म्बि)बोटक-प्रत्यया(य)-पादावर्त्त-शतं

२६. वापी[2] च । एतत्सोद्रङ्गं सोपरिकरं स-वात-भूत-धान्य-हिरण्यादेयं सोत्पद्यमान-विष्टी(ष्टि)कं समस्त-राजकीयानाम-

२७. हस्त-प्रक्षेपणीयं भूमि-च्छिद्र-न्यायेन उन्नत-निवासी(सि)-वाज-सनेयी(यि)-कण्व-वत्स-सगोत्र-ब्राह्मण-रुद्रभूतये बलि-चरु-वैश्व-

२८. देवाग्निहोत्रातिथि-पञ्चमहायाज्ञिकानां क्रियाणां समुत्सर्पणार्थं-माचन्द्रार्क्कार्ण्णव-सरित्क्षिति-स्थिति-समकालीनं पुत्र-पौ-

२९. त्रान्वय-भोग्यं उदक-सर्ग्गेण निसृष्टं [।*] यतो[ऽ*]स्योचितया ब्रह्मदेय-स्थित्या भुंजतः कृषतः कर्षयतः प्रदिशतो वा

३०. न कैश्चित्प्रतिषेधे वर्त्तितव्यमागामि-भद्र-नृपतिभिश्चास्मद्वंश-जैरनित्यान्यैश्वर्य्याण्यस्थिरं मानुष्यं सामान्यं च भूमि-

३१. दान-फलमवगच्छद्भिरयमस्मद्दायो[ऽ*]नुमन्तव्यः परिपालयितव्य-श्च [।*] यश्चैनमाच्छिन्द्यादाच्छिद्यमानं वानु-

३२. मोदेत स पञ्चभिर्म्महापातकै[ः*]।।[3] सोपपातकै[ः*] ।।[4] स(सं)-युक्तस्स्यादित्युक्तं च भगवता वेद-व्यासेन व्यासेन ।।(।)

३३. षष्टिं वर्ष-सहस्राणि स्वर्ग्गे तिष्ठति भूमि-दः [।*] आच्छेत्ता चानुमन्ता च ।[4] तान्येव नरके वसेत् ।।[१*] पूर्व्व-दत्तां

---

१. फ्लीट : वी (?) कि (?) ।

२. पंक्ति के आरम्भ में दो अक्षरों का स्थान खाली है । लगता है यहां ताम्र-पट्ट में कोई दोष था । ऊपर की पंक्ति के भी दो अक्षर स्पष्ट नहीं है ।

३ .पूर्ण विराम जैसी रेखाएं दोनों स्थानों पर संभवतः विसर्ग के लिए हैं ।

४. अर्धविराम की एक रेखा यहां अनावश्यक है ।

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३४. द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर ।।(।)मही[*] महिमतां श्रेष्ठ।।[१] दानाच्छ्रेयो [ऽ*]नुपालनम् ।।[२*] बहुभिर्व्वसुधा भुक्ता

३५. राजभिस्सगरादिभिः ।।(।) यस्य यस्य यदा भूमिः तस्य तस्य तदा फलमितिः[२] ।[।३*] लिखितं स[ा*]न्धिविग्रहिक-स्कन्दभटेन ।।

३६. स्वहस्तो मम महाराज-श्री-धरसेनस्य ।। दू[३] चिर्ब्बर [:*]।। सं २०० ५० २ वैशाख ब १० ५ [।।*]

---

१. पूर्ण विराम की दो रेखाएं यहां अनावश्यक है ।

२. फलम् ।। इति पाठ अच्छा है ।

३. दूतकः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विष्णुगुप्त-कालीन मनग्राँव अभिलेख

शासन वर्ष १७

स्थान : बिहार में बक्सर नगर से लगभग २२ किलोमीटर दक्षिण-पश्चिम को मनग्राँव में एक जमींदार के घर से प्राप्त प्रस्तर-खण्ड पर उत्कीर्ण, जो पटना संग्रहालय में सुरक्षित है।

लिपि : अफसद अभिलेख के समान कुटिलाक्षर उत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : अविमुक्तज्ज (अविमुक्तार्य) नामक शैव द्वारा अङ्गार-ग्राम स्थित सुभद्रेश्वर (शिव) के मन्दिर में दीपक के तेल के लिये दान।

सन्दर्भ : अल्तेकर, EI, 26, p. 241.

पाठ

१. ॐ [।*] महाराजाधिराज-परमेश्वर-श्री-विष्णुगुप्तदेव-प्रवर्द्धमान विजयराज्य-
२. सम्वत्सरे सप्तदशे सम्वत् १० ७ श्रावणशुदि २ चुन्दस्कीलातपोवन-
३. प्रतिष्ठित-श्रीमित्त्रकेशवदेव-प्रतिव(ब)द्धपुष्पपट्टे स्वसिद्धान्ता-भिरत[1] अने-
४. कशिवसिद्धायतनतीर्थविगाहनपवित्त्रीकृततनुः कुटुक्कदेशी-
५. य[2] अविमुक्तज्जः[3] अङ्गारग्रामके सकलकुटुम्वि(म्बि)नां सका-शादाचन्द्रा-

---

१. स्वसिद्धान्ताभिरतोऽनेक° पढ़ें।
२. °देशीयोऽवि° पढ़ें।
३. °ज्जोऽङ्गार° पढ़ें।

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. र्कक्षितिसमकालीनं तैलस्य पलमेकमुपक्रीय भगवत:

७. श्रीसुभद्रेश्वरदेवस्य प्रदीपार्थं प्रतिपादितवान् ।। एवं योन्यथा

८. करोति यदत्रापायंस्तनद[1]वाप्नोतीति ।। लिखितं देवदत्तेन

९. संक्षिप्ता क्रयचीरिका[2] । उत्कीर्णं सूत्रधारेण कुलादित्येन धीमता ।।

---

१. अनन्त सदाशिव अल्तेकर इसका पाठ-शोध करके 'यदत्र पापं स तदवाप्नोतीति' पढ़ते हैं । उनका दूसरा सुझाव-'योऽत्रापायस्स तमवाप्नोतीति उन्हें स्वयं इतना स्वीकार्य नहीं ।

२. क्रय-चीरिका = क्रयलेख्य
गृह-क्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम् ।
पत्रं कारयये यत्तु क्रयलेख्यं तदुच्चते ।। (बृहस्पति)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जीवितगुप्त (द्वितीय) का देवबरणार्क अभिलेख

स्थान : बिहार में आरा नगर से लगभग ५० किलोमीटर दक्षिण-पश्चिम को देवबरणार्क ग्राम के मन्दिर में एक स्तम्भ पर उत्कीर्ण।

लिपि : अफसद अभिलेख के समान कुटिलाक्षर उत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : सूर्य देवता के लिए वारुणिका ग्राम के पूर्व प्रदान को तथैव रखने का अनुमोदन। इस लेख में आदित्यसेन के अनन्तर तीन परवर्ती गुप्त राजाओं का वर्णन है। यहाँ बालादित्य तथा मौखरी नृप सर्ववर्मन् एवं अवन्तिवर्मन् का उल्लेख महत्त्वपूर्ण है।

संदर्भ : कनिंघम, ASI, 16, p. 68, 73; फ्लीट, CII. III, No. 46; पाण्डेय, HLI, p. 153.

१. ·········[1][न]मः [।।*] स्वस्ति शक्तित्त्रयोपात्त-जयशब्दान्महा-
नौ-हा(ह)स्त्यश्व-पत्ति-सम्भार-दुर्निवाराज्जय-स्कन्धावारात्
गोमतिकोट्टक-समीप-वास-

२. [कात्]······[2][श्री-माधव] गुप्तस्तस्य पुत्त्रस्तत्पादानुध्यातः परम-
भट्टारिकायां राज्ञ्यां महादेव्यां श्री-श्रीमत्यामुत्पन्नः परमभागवतः
श्री-आदित्य[3][से]-

---

१. भगवानलाल इन्द्रजी द्वारा यहाँ सुझाया गया पाठ 'वरुणवासिभट्टारकाय' स्वीकार्य नहीं क्योंकि जैसा कि फ्लीट ने कहा है यहाँ पाँच या छः से अधिक अक्षर नष्ट हुए प्रतीत नहीं होते।

२. फ्लीट के अनुसार यहाँ माधवगुप्त का कोई धार्मिक विरुद उत्कीर्ण रहा होगा।

३. सन्धि करने पर श्यादित्य होना चाहिए—फ्लीट।

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. [नदेवस्तस्य] पु[त्र]स्तत्पादानुध्यातः परमभट्टारिकायां राज्ञ्यां महादेव्यां श्री-कोणद(दे)व्यामुत्पन्नः परममाहेश्वर-परमभट्टारक-महार[ा]ज[ा]-

४. [धिराज-परमेश्वर]-श्रीद(दे)वगुप्तद(दे)वस्तस्य पुत्रस्तत्पादानुध्यातः परम-भट्टारिकाया [*] राज्ञ्या[*]महादेव्या[*]कमलदेव्या[1]मुत्पन्नः परममाहे-

५. [श्वरपरमभट्टारक-म]हाराजा[धि]राज-परमेश्वर-श्री-विष्णुगुप्त-देवस्तस्य पुत्रस्तत्पादानुध्यातः परमभट्टारिकाया [*]राज्ञ्या[*] महादेव्या[*]श्री-इज्जादे[2][व्या]-

६. [मुत्पन्नः परम······[3]परम]-भट्टारक-महाराजाधिराज-परमेश्वर-श्री-जीवितगुप्तदेव[:*] कुशली नगरभ(भु)क्तौ वालवीवैषयिक-श्री-वा(?वो)···

७. ··· ···पद्र (?)लिक(?क्ष)-न्तषयाति-वारुणिका-ग्राम-गोष्ठ[ा] न(?)कुलतलावाटक-दूत-सीमकर्मकरमद्या(?)

८. ·····तक-राजपुत्र-राजामत्र[4]-महा ·····क्षतिक-महादण्डनायक-महाप्रतिहार-मह[ा]सा-

९. ·····प्र(?)मातसा·····क[ु]मा[ा]रामात्य-राजस्थानीयोपरिक-·····धिक-चौरोद्धरणिक-दाण्डिक-द(दा)ण्ड-

१० [पाशिक]·····क······र्ष्णिवल-व्यायत-किशोरवाटक ग्[र]ा-मह··· द ·····त····· यणिकग····· पतिकर्म-

---

१. भगवानलाल इन्द्रजी कमल के स्थान पर कुमार पढ़ते हैं।

२. फ्लीट : 'श्रीज्जा'।

३. वही : भागवत या माहेश्वर।

४. वही : राजामात्य।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

११. ······रसक·········तास्मत[प]ाद-प्रसादोपजीविनश्च प्रतिव[ा]-
सिनश्च व्रा(ब्रा)ह्मणोत्तरा[न्*] महत्तर-क(कु)क्षिपुर-

१२. ·········विज्ञापित-श्री-वरुणवासि-भट्टारक-प्रतिव(ब)-द्धभोजक-
सूर्यमित्रेण उपरिलिखि-

१३. [त]········ग्रामादिसंयुतं परमेश्वर-श्री-वा(बा)लादित्यदेवेन
स्वशासनेन भगव[1]-श्री-वरुणवासिभट्टारक······

१४. ······क···व-परिवाहक·····भोजकहन्समित्रस्य समापत्[त्*]
या यथाकलाध्यासिभिश्च एवं परमेश्वर-

१५. श्री-शर्व्ववर्म्म······भोजकरिषिमित्र[2]······यतकं[3] एवं परमेश्वर-
श्री[म*]दवन्तिवर्म्मणा पूर्व्व-दत्तकमवल-

१६. [म्ब्य]······एवं मह[ा]रा[जाधिरा*]ज-परमेश्वर·····शासन-
दानेन भोजक-दुर्द्धरमित्रस्यानुमो—

१७. दित··· ···तेन भुज्यते [।*] तदहम्[4] किमपि·····एवं·········
मतिमान्········आनुपा(मो)दितमिति सर्व्वसमाज्ञापना[।*]
एता

१८. ········पयु··························वरुणवास्यायतनं तदनु
···
दत्तम्··

१९. ······················त्यक्ष ··································
सोद्रङ्गं सोपरिकरं सदशापराध-पञ्च·······················
··························[।।*]

---

१. फ्लीट : भगवच्छ्री ।
२. भोजक-ऋषि अथवा भोजकर्षि ।
३. यतकम् पढ़ें ।
४. तदहं पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शीलादित्य (सप्तम) का अलीना ताम्र-पट्ट अभिलेख

गुप्त-वलभी संवत् ४४७

स्थान : गुजरात के कैरा (खेड़ा) जिले में नादियाड नगर से लगभग २२ किलोमीटर उत्तर-पूर्व को अलीना ग्राम के पास से प्राप्त दो ताम्र-पट्टों पर उत्कीर्ण। अब रॉयल एशियाटिक सोसाइटी लन्दन में सुरक्षित।

लिपि : दक्षिणी ब्राह्मी।

भाषा : संस्कृत।

विषय : शीलादित्य (सप्तम) द्वारा ब्रह्मचारी आखण्डलमित्र को पञ्चमहायज्ञादि सम्पन्न कराने के लिए महिलाबली ग्राम का दान।

संदर्भ : ब्यूलर, IA, 7, p. 79; फ्लीट, CII, III, No. 39.

१. ॐ स्वस्ति श्रीमदानन्दपुरसम[ा*]वासित-जयस्कन्धावारे[1] प्रसभ-प्रणतामित्राणां मैत्रकाणामतुलबल-संपन्न-मण्डलाभो[गसंस]-क्त-संप्रहार-शत-लब्ध-प्रतापा-

२. त्प्रतापोनत-दान-मानार्ज्जवोपार्जितानुरागादनुरक्ता[2]-मौलभृतः[3]-श्रेणी-बलावाप्त-राज्यश्रियः परममाहेश्वरः[4]-श्री-भट्टावर्क्कादा(द)-व्यवच्छिन्न-वंशान्मा-

---

१. स्कन्धावारात् पढ़ें।
२. रक्त पढ़ें।
३. भृत पढ़ें।
४. माहेश्वर पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. तापितृ-चरणारविन्द-प्रणति-प्रविक्क्ताशेष-कल्मषः शैशवात्प्रभृति खङ्गद्वितीयः[१]-बाहुरेव समद-पर-गज-घटास्फ[ो]टन-प्रकाशित-[सत्त्व-नि]कषः तत्प्र[२]-

४. [भा]व-प्रणताराति-चूड़ार[*त]न-प्रभा-स[*]सक्त-पाद-नख-रश्मि-संहतिः सकल-स्मृति-प्रणीति(त)-मार्ग्गः-[३]सम्यक्क्रिया-पालनः[४]-प्रजा-हृदया-रञ्जना[द*]-न्वर्त्थ-राजशब[दो] रूप-का-

५. न्ति-स्थैर्य्य[५]-गांभीर्य्य-बुद्धि-संपद्भिः स्मर-शश[ा]ङ्काद्रिराजोदा(द)धि-त्रिया(त्रि)दशगुस(रु)-धनेशानतिशयानः शरणगताभय-प्रदानः[६]-परतया तृणवद्ध(द)पास्ता[शेष-स्व]वीर्य्य-

६. फलः प्रार्त्थनाधिकार्त्थ-प्रद[ाना]नन्दित-विद्वत्सुहृत्प्रणयिहृदय [:*] पादचारीव सकलभुवनमण्डलाभोगप्रम[ो*]द[:] परम-

७. माहेश्वरः श्री गुहसेनः [।।*[तस्य सुतः तत्पाद-नख-[मयूख*]-संतान-विसृज(त)-जाह्नवीजलौघ-प्रक्षालिताशेष-कल्मषः प्रणयि-शतस-

८. हस्रोपजीव्यमान-संपद् रूप-लोभादि[वा]श्रृ(श्रि)तः सरभा(भ)-समाभिगामिकैः गुणैः सहज-शक्तिः[७]-शिक्षा विशेष-विस्मापित-लब्ध-धनुर्धरः[८] प्रथम-[न]-

९. रपति-समतिसृष्टानामनुपालयिता धर्म्म[दाया]नामपि(पा)कर्त्ता-प्रजोपघातकारिणां[९] उपप्लवानां शमयिता श्री-सरस्वत्योरेकाधि-

---

१. द्वितीय पढ़ें ।
२. प् के नीचे र का चिह्न नहीं लगा है ।
३. मार्ग्ग पढ़ें ।
४. पालन पढ़ें ।
५, यहाँ 'र्' का चिह्न उत्कीर्ण नहीं है ।
६. प्रदान पढ़ें ।
७. शक्ति पढ़ें ।
८. फ्लीट इसे 'सर्व्व' या 'अखिल' से बदलते हैं ।
९. °कारिणाम् पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वासस्य सहोपप[1]ति-प-

१०. पक्ष-लक्ष्मी-परिभोग-दक्ष-विक्रमः विक्रमोपम-संप्राप्त[2]-विमल-पार्त्थिव-श्रीः परममाहेश्वरः श्री-धरसेनः [।।*] तस्य सुतः तत्पादानुद्ध्यातः सकल-जगदानन्दनात्य।(य)द्भु ु-

११. त-गुण-समुद्र[3]स्थगित-समग्र-दिग्मण्डलः समर-शत-विजय-शोभा-सनाथ-मण्डलाग्रद्य[* ु]ति-भासुरासन-पीठो व्यू(दू)ढ-गुरु-मनोरथ-महाभाव(र): सर्व्व-विद्या-पार-परम-

१२. भागाधिगम-विमल-मतिरपि सर्व्वतः सुभाषित-लवेनापि स्वोप-[4] पादनीय-परितोषः समग्र-लोकागाध-गांभीर्य्य-हृदयोपि सव्य(च्च)-रितातिशय-सुव्यक्त-परम-

१३. कल्याणस्वभावः [ि*] खलीभूत-कृतयुग-नृपति-पथ-विशोधनाधि-गतोदग्र-कीर्त्तिः धर्म्मानुगा(रो)धा(ो)ज्ज[व*]लतरीकृतार्त्थ-सुखस[ं]पदु[प*]-सेवा-निरहढ(निरूढ)-वर्ज[5] मादित्य[6]त्वि(द्वि)तीय-नामा

१४. पा(प)रमम[ा*]ह[े*]श्वरः ग्री(श्री)-गी(शी)लादित्यः [।।*] तस्य सुतः[6] तत्पादानुध्यातः स्वयवु(मु)पेन्द्रगुरुणेप(व) गुरुः[7] गुरुणात्यादरवता समभिलषणीयाणामपि[8] राजलक्ष्मी[ं*]

---

१. फ्लीट इसे संहताराति से बदलते हैं ।
२. फ्लीट विक्रमोपसंप्राप्त या विक्रमोपक्रमसंप्राप्त परिवर्तन सुझाते हैं । परन्तु मूल को बदले बिना ही अर्थ ठीक लगता है ।
३. समुदय पढ़ें ।
४. फ्लीट स्व को सुखो से बदलते हैं ।
५. धर्म्मादित्य पढ़ें ।
६. फ्लीट के अनुसार यहां तस्यानुजः उत्कीर्ण किया जाना चाहिए था । अगले नृप को कुछ अन्य लेखों में शीलादित्य का अनुज कहा गया है ।
७. यह शब्द यहाँ अनावश्यक है ।
८. समभिलषणीयामपि पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१५. स्कन्धासक्त[ां] परमभद्राणां[१] धुर्य्यस्तदाज्ञा[२]-स[ं*]पादने(नै)-
क-रसतयोद्वाहन[३]-खेद-सुख-रतिभ्यां[४] अनायासित-[सत्त्व*]-
संपत्ति[:*] प्रभाव-सां(सं)पद्वा(व)शीकृत-नृपति-शत-शिरो-

१६. रत्ना(न)-व्ना(च्छा)योपगूह(ढ)-पादपीठोपि परामावज्ञा[५]भिमान-
सह(र)सानालि[ङ्ग*]त-मनोवृत्तिः प्रणतीरोका[६] परित्यज्य
प्रख्यात-पौरुषाभिमानैरा(र)प्या(प्य)रातिभिरनासा[दि]-

१७. त-प्रकृत्योपायः[७] कृत-निखिल[८]-भुवनामा(मो)द-विमल-गुण-स[ं]
हतिः प्रसभ-विघटित-सकल-कलि-त्रिल[सि*]सत-गतिर्मंत्र[९]-
जनाभिद्रा(दो)हिभिराशषैः (रशेषैः) दोषैरनामृ-

१८. [ष्टा*]त्युन्नत-हृदय[:*] प्रख्यात-पौरुषः शास्त्र-कोट(कौश)-
लातिशय[ो]गुण[१०]गणतिथ-विपक्ष-क्षितिपति-लक्ष्मी-स्वयं-स्वयं[११]
ग्राहे(ह)-प्रकाशित-प्रवीर-पुरुष-प्रथमः(म)-[संख्या]-

१९. धिगमः य(प)रमम[ा*]हेश्वरः श्री-खरग्रहः [।*] तस्य सुतः
तत्पाद[ा*]नुध्यातः सर्व्व[ं*] [*वि]द्याधिगमः-पहित[१२]-निखिल-
विद्वज्जन-मनः परितोषिति[१३]-ष(श)य [:*] सत्[त्*]व-

---

१. परमभद्र इव पढ़ें ।

२. धुर्य्य के ऊपर र् का चिह्न तथा ज्ञ में ञ का चिह्न उत्कीर्ण नहीं है ।

३. रसतयोद्वहन् पढ़ें ।

४. भ्याम् पढ़ें ।

५. परावज्ञा पढ़ें ।

६. प्रणतिमेकां पढ़ें ।

७. प्रतिक्रियोपायः पढ़ें ।

८. ख में इ की मात्रा उत्कीर्ण नहीं है ।

९. फ्लीट का संशोधन-गतिर्न्नीच ।

१०. यह शब्द यहाँ अनावश्यक है ।

११. दूसरा 'स्वयं' अनावश्यक है ।

१२. °धिगम-विहित-पढ़ें ।

१३. परितोषाति° पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२०. स [ं*] पत्त्यागै: शौर्य्येण च विगतानुस[ं*]धान-समाहितारातिपक्ष-मनोरथ-रथाक्ष-भंग: सम्यगुपलक्षितानेकशास्त्रकलालोकचरित्रगह्वर-वि-

२१. भागोपि परमभद्र-प्रा(प्र)कृतिरतिकृतृ(त्रि)भ-प्रश्रयोपि विभ(न)य-शोभा-विभूषणा:(ण:) समर-शत-जयपताकाहरण-प्रत्ययोदग्र-बाहु-दण्ड-विध्वंसित-प्र[तिप]क्ष-

२२. दर्प्पोदय: स्व-धनु[:*]-प्रा(प्र)भाव-[परि*]भूतास्त्रकौशलाभिमान-सकल-नृपति-मण्ड[ला*]भिनन्दित-शासना(न): पर[ममा]हेश्वर: ग्री(श्री)-घरसा(से)न: [।।*] तस्यानुज: त[त्]प[ादानु]-

२३. ध्यात: सच्चरित[ा*]तिरु(श)यित-सकल-पूर्व्व-नरपति: दुस्साधना[ना*]मपि प्रसाधयिता विषय[ा*]णाम् मू[ं*] [र्]-त्तम[ा*]निव पुरुषकार: परिवृद्ध-गु[णा]नुराग-[निर्भ्भ]-

२४. र-चित्तवृत्ति[भि*]: मनुरिव स्वा(स्व)यमभ्युपपन्न: प्रकृतिभिरवि(धि)गत-कलाकलाप [:*]कान्ति तिरस्कृत-सलाछ(ञ्छ)न:(न)-कुमुदा(द)-नाथ[:*] प्राज्य-स्थगित-दिग[न्त]तराल[:]

२५. प्रध्वंसित-ध्वान्त-राशि: सततोदित-सविता प्रकृतिभ्य[:*] पर[ं*] प्रत्ययमर्त्थवन्तमतिप(ब)हुतिथप्रयोजनानुबंधमम[1][ा*]गम-परिभू(पू)र्ण[ं*] विदधाम(न): सन्धि-विग्रह-

२६. समास-निश्चय-निपुण[:*] स्थानमनुपदेशं ददन्तं[2] गुणवृद्धिराजदिनित[3]-स[ं*]स्क[*]र-साधूनां राज्य-शालातु[री]यतन्त्रयोरुभयोरपि निष्णात: प्रक्क्र-

२७. ति-विक्रमोपि करुणामृदुहृदय: श्रुतवानप्यि(प्य)ग[र्]व्वत: कान्तोपि प्रशमि(मी) शि(स्थ)रसौह[ा*]र्द्दोपि निरसिता दोष-

---

१. एक म अतिरिक्त है।

२. फ्लीट का संशोधन : स्थानानुरूमादेशं ददतां।

३. फ्लीट का संशोधन : विधानजनित।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दोषवता[1]मुदयसमुपज[ि]न-

२८. त-जनानुराग-परिवृ[ं*]हित-भुवन-समर्त्थित-प्रथित-बालादित्यि (त्य)-द्वितीयनाम[ा*] परममाहमन(हेश्वर)ग्री(श्री)-धरसन[2][।।*] तस्य सुतः तत्पादरदेल[3]-प्रणा-

२९. म-धरणि-कषण-दि(ज)नित-किण-लांछन-ललाट-चन्द्र-स(श)-कल[:*] शिशुभाव एव श्रवणनिहित-मौक्तिकालंकार-विभ्रमा-मल-श्रु त-विशो(शे)ष[:*] प्रदान-स-

३०. लिल-क्षालिताग्रहस्तारविन्दः व्यास[4] इव मृदु-कर-ग्रहणादमन्दी-कृतानन्दविधिः वसु[ं*]धरायाः रा(का)र्म्मुरा(क)-धनुर्व्व[े*]द इव सभाविनाश[5]प्रलक्ष्यकलाप[:*] प्र-

३१. णत-समस्त-सामन्त-मण्डलापमोनिर्भृ त-चूडामण-नियमन-शासनः परम[माहे*]श्वरः परमभट्टारक-महार[ा*]जाधिराज-परमेश्वर-चक्रवर्ति-श्री-ध-

३२. र-सेनः [।।*] ततपितामह-भ्रातृ-श्री-शीलादित्यस्य वा(शा)ङ्ग-पाणेरिवाग्रजन्मनो[7] भक्ति-बन्धुरावयव[कल्पित-प्रणते]रतिधव-लया तत्पादारविन्द-प्रपृ(वृ)त्त्या चरण-नख-मणि-

३३. [रु]चा मन्दाकिन्येव नित्या(त्य)ममलितोत्तमांव(ग)देशस्या-व(ग)स्त्यस्य[े*]व राजक्चोः[8] द[ा*]क्षिण्यमानतन्वानस्य[9] प्रवलधवलिव्नो(म्ना) यग(श)सां वलय[े*]न म-

---

१. दूसरा दोष शब्द यहाँ अनावश्यक है।
२. ध्रु वसेनः पढ़ें।
३. °पादकमल पढ़ें।
४. इसका संशोधन फ्लीट ने कन्याया किया है।
५. संभाविताशेष पढ़ें।
६. मण्डलोत्तमाङ्ग-धृत-चूडामणीयमान पढ़ें।
७. खरग्रह(द्वितीय) के अभिलेख के आधार पर फ्लीट °रिवाङ्गजन्मनो संशोधन करते हैं।
८. राजर्षेः पढ़ें।
९. °मातन्वानस्य पढ़ें।

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३४. [ण्डित]-ककुभा नवयाथरलिताशेपि: खड्गपरिवम[1]-मण्डलस्य पये(यो)द-श्याम-शिखर-चूचुर-कचि-सम-विन्यस्त-स्तन[2]युगाया: क्षित [ ]: पत्य [ ]:-श्री[दिरभ]ट-

३५. स्याग्रजः[3] क्षिति[प*]स[ं]हृतेः चरु विभागस्य[4] गु (शु)चिर्य्यग-(श)ोङ्ग(ङ्शु)क-भृतः स्वयंवराभिलाषिणीमिव राज[य]श्रि-यमर्प्पयन्त्या: कृत-प[ि]रग्रह[: शौर्य्यमप्रतिह]-

३६. त-प्रतापा[5]नमित-प्रचण्डरिपुमण्डलं मण्डलाग्रमपालंपधुग्रानः[6] शरदि प्रसभम[ा*]कृष्ट-शिलीमुख-पा(बा)णासनापादितप्रसाध-[नानां]

३७. पर-भुवां विधिवदाचरितकरग्रहणः पूर्व्व[मे*]व विविध-वर्न्न(र्ण)ोज[ज्*]वलेन ग्रु(श्रु)तातिशय[*]नो[द्भा]सित-श्रवण-युगलः पुन[ः-पुनरुक्तेनेव रत्ना]-

३८. [ल]ङ्[क]ारेणालङ्कृतग्रो(श्रो)त्रा(त्रः) परिस्फुरत्का(क)-टक-विकट-कीट-पक्ष-रत्नकिरणमि(म)प(वि)च्छिन्न-प्रदान-सलिल-निवहानवसे[क[7]-विलसन्नव-शैवलां]-

३९. कुरम(मि)प(व)ाग्रपाणिमुद्वह[न्*] धृत-विश[ा*]ल-रत्न-प(व)लय-जलधि-वेल[ा*]-तटायम[ा*]न-भुज-परिष्वक्त-विश्वम्[भ]रः परमम[ा*]हेश्वरः श्री-ध्रुवसेनस्तस्याग्र-

---

१. फ्लीट द्वारा संशोधित पाठ : नभसि यामिनीपतेर्व्विरचिताखण्डपरिवेष ।

२. फ्लीट द्वारा संशोधित पाठ : चूचुक-रुचिर-सह्य-विन्ध्यस्तन ।

३. °ङ्गजः पढ़ें ।

४. संहतेरनुरागिण्यः पढ़ें ।

५. फ्लीट प्रताप के स्थान पर व्यापारम् संशोधन प्रस्तुत करते हैं । परन्तु इसकी आवश्यकता नहीं है ।

६. ०ग्रमिवालम्बमानः पढ़ें ।

७. निवहावसेक पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४०. [जोऽपर]-म[हीप]ति-स्पर्द्ध(र्श)-दोष-नाग(श)न-[ि]धय[े]व लक्ष्म्या स्वयमतिस्पष्ट-चेष्टमाश्लिष्टाङ्गयष्[टिरति-रुचिरतर-चरित-गरिम-परिकलित-सकल-न]रपा [त]रति-

४१, प्रकृष्टानुराग-[स*]रभस-वशीकृत-प्रणत-समस्त-सामन्तचक्र-चूडा-मणि-मयूख[खचित-चरणकमल-युगलः]प्रोद्दाम[ोदार]दो [र्द्दण्ड]-दलित-द्विषद्व-

४२. र्ग-दर्प्पः प्रसर्प्पत्पटीयःप्रताप-प्लोषिताशेष-शत्रु-व[ं*]शः प्रणयि-पक्ष-नि[क्षिप्त-लक्ष्मीकः प्रेरित-गदोत्क्षि]प्त-सु[दर्शन-चक्रः परिहृत-

४३. [बाल-क्री]डोऽनधःकृत-द्विजातिरेक-विक्रम-प्रसाधित-धरित्रीतलो-नङ्गीकृतजलशय्य[ोपूर्व्व-पुरुषोत्त]मः [साक्षाद्धर्म्म इव सम्यग्व्य]-वस्था-

४४. पित-वर्णाश्रमाचारः पूर्व्वैरप्युर्व्वि(र्व्वी)पतिभिः तृष्णालव-लुब्धैः यान्यपहृता[नि देवब्रह्म]-द[े]या[नि ते]षामप्य[तिसरल]मनःप्र-

४५. [स]रमुत्स[ङ्क]ल[नानु]मोदनाभ्यां परिमुदित-तृ(त्रि)भुवना-भिनन्दितोच्छ्रितोत्कृष्ट-धवल-ध[र्म्म]ध[वजः [प्रकाशित-नि]ज-वङ्शः द[े]व-द्विज-गुरू]न् प्रतिपूज्य-यथार्ह]मनवरत-

४६. प्रवर्त्तित-महोद्रङ्ग[ा]दि- दान-व्यसनानुपजात[१]-संतोषोपात्तोदार-कीर्तिः(र्त्ति)-[परं]परा [दन्तुरित-नि ि]खल-दिक्चक्रवालः [स्पष्ट-मेव य]थार्त्थ[ं] धर्म्मादित्यि(त्य)-

४७. [द्वि]तीय-नामा पर[म*]माहेश्वरः श्री-खरग्रहः [।।*] तस्या-ग्रजन्मनः कुमुदषण्ड-श्री-[विकासिन्या कलावतश्चन्द्रिकयेव कीर्त्या धवलित-स]कल-दिग्मण्ड-

---

१. व्यवस्थानोपजात या व्यवसायोपजात पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४८. लस्य खंडितागुरु-[वि]लेपन-विङ[1]-श्यामल-विन्ध्य-[शै]ल-विपुल-पयोधरायाः क्षि[तेः पत्यु]ः श्री-शीलादित्यस्य सूनु[र्नव-प्रालेय-किरण इ]व

४९. प्रतिदिन-संवर्द्धमान-हृदय[2]कला-चन्द्र(क्र)वालः [केसर]न्द्र-[शि]-शुरिव राजलक्ष्मीं सकल[3]-वन[स्थलीमि]वालंकुर्व्वाणः[शिख]-ण्डिकेतन इव रुचि [मच्चूडा]-म[ण्डनः]

५० प्रचण्ड-शक्ति-प्रभावश्च शरदागम इव[4] द्विषतां परममाहेश्वरः परमभट्टारक-महाराजाधिराज-परमेश्वर-श्री-बप्प(बाव)-पादानुध्यातः परमभ[ट्]टारक-[महारा-]

५१. जाधिराज-परमेश्वरः श्री-शीलादित्य देवस्तस्य सुतः[5] पारमैश्वर्य्य [:*] [कोपाकृष्ट-निस्तृ(त्रि)ङ्श-पात-विदलिताराति-करि-कुम्भ-स्थलोल्लसत्प्र [सृत-म]हा-प्रतापानलः प्रा[कार]-

५२. [परिगत*]-जगन्मण्डल-लब्धस्थितिः विकट-निज-दोर्द्दण्डावलंबिना सकल-भुवनाभोगभाजा मन्थास्फलन-विघु[त-दुग्धसि]न्धु-फे[न-पिण्ड-पा]ण्डुर-यशो-विता[नेन]

५३. विहितातपत्रः परम[माहे*]श्वरः परमभट्टारक-महाराजाधिराज-परमेश्वर-श्री-बप्प-पादानुध्यातः परमभट्टारक-महारा[जाधि]-राज-प[रमेश्व]र-[श्री]-शीलादित्य[देवः] [।।*] [तत्पुत्रः]

---

१. पिण्ड पढ़ें ।
२. हृदय शब्द यहां अनावश्यक है ।
३. °लक्ष्मीमचल पढ़ें ।
४. फ्लीट के अनुसार इससे आगे द्विषतां तक निम्न पाठ उत्कीर्ण नहीं हुआ है—प्रतापत्रानुल्लसत्पद्मः संयुगे विदलयन्नम्मोधरानिव परगजानुदय। तपन-बालातप इव संग्रामेषु मुष्णन्नभिमुखानामायूंषि
५. सुतः के साथ जोड़ें—सतोपरपृथ्वी-निम्र्माण-व्यवसायासादित ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५४. प्रतापानुराग-प्रणत-समस्त-सामन्त-चूडामारि(मणि)नख-मयूख-
निचित-रञ्ज[ज]त-पादारविन्दः परम[मा*]हेश्वरः परमभट्टारक-
महाराजाधिराज-परमेश्वर-श्री-[बप्प]-पादा-

५५. नुद्धयातः परमभट्टारक-महाराजाधिराज-परमेश्वर-श्री-शीला-
दित्यदेव[:।।*]तस्यात्मजः प्रशमितरिपुबल-दर्प्पः विपुल-जयमङ्ग-
लाश्रयः श्री-समालिं[गन-लालि]त-

५६. वक्षा[:*] सम[*ु]पोढ-नारसिङ्घ-विग्रहोर्जिजतो[द्*]धुरशक्तिः
समुद्धा(द्ध)त-विपक्ष-भूभृत्-कृतनिखिल-गोमण्डल-रक्षः पुरुषो-
त्तम[:*] प्रणतनाभूत[१]-पार्त्थिव-किरीट-

५७. [मा]णिक्य-[म]सृणित-चरण-नख-मयूख-रंजितागे(शे)जा(ष)-
दिग्वधू-मुखः परममाहेश्वरः परमभट्टारक-महाराजाधिराज-
श्री-बप्प-पा-

५८. [दा]नुध्यातः परमभट्टारां(रक)-महार(रा)ल(जा)धिराज-परमे-
श्वर-श्री-शीलादित्यदेवः परममाहेश्वरः[१] [।।*] तस्यात्मजः
प्रथित-दुस्सह-वीर्य्यचक्रो लक्ष्म्यालय[ो]

५९. [नर]क-नाश-कृतप्रयत्नः पुथ्वी-समुद्धरण-कार्य-कृतैकनिष्ठः
संपूर्ण्ण-चन्द्र-कर-नि[र्*]म्मल-जात-कीर्त्तिः [।।*] ज्ञात-[त्र]-
य[ो]-गुणमयो जित-वैं[र]-पक्षः संप[न्न]-

६०. [-⏑]म-सुखः सुखदः सदैव ज्ञानालय [:*] सकल-वन्दित-लोक-
पालो विद्याधरैरनुगतः[२] प्रथितः प्रि(पृ)थिव्यां [।।*] रत्नोज[ज्*]
वलो वर-तनु-

६१. [र्गु]ण-रत्न-राशिः ऐश्वर्य्यं-विक्रम-गुणैः परमैरुपेतः सत[त्*]वो-

---

१. शीलादित्य का यह विशेषण ५७ वीं पंक्ति में आ चुका है । यहाँ यह अनावश्यक है ।
२. तुलना करें आदित्यसेन के अफसद लेख में-विद्याधराध्यासितः (पंक्ति-१)।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पकारकरणे सततं प्रवृत्तः स[ा*]क्षा[ज्*]जनार्दना(न) इवार्दित-दुष्ट-दर्प्पः [।।*]

६२. युद्धाः(द्धे)सकृद्गा(ग)ज-घटा-घटनैक-दक्षः पुण्यालयो जगति गीतमहाप्रतापः राजाधिराज-परम[े*]श्वर-वङ्श-जन्मा श्री-ध्रूभटो जयति जा-

६३. त-महाप्रमोदं(दः)[।।*] [स च*] परमेश्वरः[१] परमभट्टारक-महाराजाधिराज-परा(र)मेश्य(श्व)र-श्री-प(ब)प्प-पाया(दा)नुद्धयातः परा(र)मभट्टारन(क)-महाराजा-

६४. धिराज-परमेश्वर-श्री-शीलादित्यदेवः सर्व्वानेव समाज्ञापयत्यस्तु वः संविदित[ं*] यथा मया म[ा*]तापित्रोरात्मश्च पुण्य-यशोभिवृ-

६५. द्धये ऐहिकामुष्मिक-फलावाप्तय्यर्थं श्रीमदानन्दपूर-वास्तव्य तच्चातुर्विद्यसामान्य-श[ा*] र्क्कराक्षिसगोश्र(त्रा)बह्वृच-स-ब्रह्मचारि-

६६. भट्टाखण्डलमित्राये(य)भट्ट-विष्णु-पुत्राय बलि-चरु-वैश्वदेवा-ग्निहोत्र-क्रतु-क्र(क्रि)याद्युत्सर्प्पणात्थे (त्थं) ग्री(श्री)-खेटकाहारे उप्पलहेट-

६७. पथके महिल(ला?)वली-न[ा*]-ग्रामः सोद्रङ्ग[:]स[ो]परिका(क)रः सोतपद्या(द्य)मान-विष्टिकः स-भूत-पा(वा)त-प्रत्या-दोयः[२] स-दशापराधः स-

६८. भोग-भागः स-धान्य-हिरण्याद[े*]यः सर्व्वराजकीयानः (नाम्) अहस्तप्रक्षो(क्षे)पश(ण)ीयः पूर्व्व-प्रदत्त-दोप(देव)-दाय-प्र(ब्र)ह्मदाय-वर्ज्जा (र्ज्जं) भूम्रा(भू)मिच्छिद्रन्याय [े*]नाचन्[द्र]ा[र्*]क्का-

---

१. परममाहेश्वरः पढ़ें।

२. प्रत्यायः पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६९. ण्णव-क्षिति-पर्व्वत-समकालीनः पुत्रपौत्रान्वय-भोग्य उदय(क)ा-
तिसर्ग्गेण ब्रह्मदायत्वेन प्रतिपादितः [।*] यतोभ्य(स्य)ोचि-
तया ब्रह्मदा[य-स्थि]-

७०. त्या भुंजतः कृषतः कर्षापयतः प्रतिदिशतो वा न कैश्चिद् व्यासेधे
र्व्वात्तितव्य[ं*]।। आगामि-भद्रनृ(नृ)पतिभिः अ-

७१. स्मद्वङ्शजैरन्यैर्व्वानित्यानित्यान्यैश्वर्य्याण्यस्थिर[ं*] मानुज्य
(ष्य)कं सामान्यं च भूमिदानं(न)फलं[2] अवगच्छद्भिः[3] अयम-

७२. स्मद्दायोनुमन्तव्यः पालयितव्यश्च [।।*] उक्तञ्च पे(वे)द-
व्यासो(से)न व्यासेन [।*] बहुभि [र्*]व्वसुरधा[4] भुक्ता राजभिः
सगरादिभिः

७३. यस्य यस्य यदा भूमिस्तस्य तस्य तदा फल[ं*]। (।।) यानीह
दत्तानि पुरा न्न(न)रेन्द्रैः धनानि धर्म्मायतना(नी)कृआ(कृ)-
तानि निर्म्माल्यवान्तः(त)-

७४. प्रति[मा]नि तानि के(को) नाम [सा*]धु[ः*] प्रतिराददीतः[5]
[।।*]षष्टि-वर्व(र्ष)-सहस्राणि स्व[र्*]ग्ग[े*] तिष्ठति भु[भू]-
मिदः अ(आ)च्छेत्ता चानुमंत[ा]च्च(च) तान्येव नर-

७५. [के व] सेत् ।। भुष्वा(विन्ध्या)टवीष्वते(तो)यासु सषु(शुष्क)-
कोटर-वासिनः कृष्ण[ा*]हयो हि जायन्तो(ते) भूमिद[ा*]यं
हरन्ति य [े*]।। दूतके(को)त्र महाप्रतिहा-

---

१. 'र्वानित्यान्यै' पढ़ें।
२. फलम् पढ़ें।
३. द्भिर् पढ़ें।
४. वसुधा पढ़ें।
५. पुनराददीत पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

७६. [र]····· [1]ह[ा*]क्षपटलिक-त्र[2]-राजकुल-श्री-सिद्धसेन [:*]ग्री(श्री)-शर्व्वटासुतः [।*] तव(था)तन्नियुक्त-प्रतिनिर्त्तक-कुलपुत्रासा(मा)-

७७. त्य-ग [ु*]हेन हेम्वटपुत्रेण लिखितमिति[3] ।। संव[त्]सर-शत-चतुष्टये सप्तचत्वारिङ्शदधिके द्ये(ज्ये)ष्ठ(ष्ठ)-शुद्ध पंचम्यां[4] ग्रङ्क-

७८. त[:*] सव[5] ४०० ४० ७ श्रे(ज्ये)ष्ठ गु(शु) ५ [।।*] स्वहस्तो मम [।।]

---

१. ब्यूलर के ग्रनुसार यहाँ श्री-देट होना चाहिए। फ्लीट के ग्रनुसार यहाँ केवल 'म' की ग्रावश्यकता है।

२. यह ग्रक्षर यहाँ ग्रनावश्यक है।

३. फ्लीट के ग्रनुसार 'लिखित' से ग्रागे 'शासनम्' होना चाहिए।

४. पंचम्याम् पढ़ें।

५. संवत् पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ईश्वरवर्मन् का जौनपुर अभिलेख

स्थान : उत्तरप्रदेश के जौनपुर नगर में जामा मस्जिद के दक्षिणी द्वार के मस्तक पर एक प्रस्तर-खण्ड पर उत्कीर्ण। लेख का अधिकांश नष्ट हो गया है।

लिपि : उत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : मौखरि राजा ईश्वरवर्मन् का वर्णन। धारा नगरी, आन्ध्रकुल, सुराष्ट्र प्रदेश, रैवतक पर्वत आदि नाम यहाँ उपलब्ध होते हैं।

संदर्भ : कनिंघम, ASI, 11, p. 124; फ्लीट, CII, III, No. 51.

पाठ

१. ······र···क्ष···ल···गम् ॥ दोर्भ्याम(मा)त्मभुवो धनुः सह-भुवा क्षत्त्रेण लब्ध(ब्ध)ात्मना विस्तरि-

२. ·· [३]दयिनि मुखराणां भूभुजामन्ववाये। सकल-पुरुष-शक्ति-व्यक्त-शार्ङ्ग-प्रतापो

३. ···कर्म्मणा याज्ञं धू[1]मवितान-मेघ-निवहः पुण्यं वितेने दिवि[2] ॥

४. ······लक-स्रस्तालकाग्रं कुलैः ॥ तस्य दिक्षु [व]ततामल-कीर्त्तेरात्मजो नृपतिरीश्वरवर्म्मा

५, ······[कृ]पानुराग-शमित-क्रूरागमोपद्द्रवैर्लोकानन्द-करैर्गुणै-र्गुणवतां को नाम

६. ······[अ]धिष्ठितं क्षितिभुजां सिंहेन सिंहासनं[3] ॥ धारा-मार्ग्ग-विनिर्गताग्नि-कणिका

---

१. ध के नीचे 'उ' की मात्रा नष्ट हो गई है।

२. पूर्ण विराम से आगे पंक्ति को पूरा करने के लिए कुछ उत्कीर्ण किया गया है।

३. सिंहासनम् पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

७. ......दम् ॥ विन्ध्यादद्रेः प्रतिरन्ध्रमन्ध्रपतिना शंकापरेणासितं यातो रैवतकाचलं

८. ......सां वारणानां घटासु व्याप्तेषूत्खात-खड्ग-द्युति-खचित-भुजेष्वन्ध्रसेनाभटेषु

९. ......र-प्रपात-सलिलैः स्नातं शिलागन्धिभिः प्रालेयाद्रि-भुवश्च शीतपयसः प्रक्षा-

१०. ......रेणुभिर्गिरि-सरित्पुरोर्म्मिभङ्गाकुलैरुत्सर्प्पद्भिरनुप्रगेपि[1] दिवसो यस्यापा-

११. ......विः य......येन..............

---

१. प्रागेऽपि पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ईशानवर्मन् का हड़ाहा अभिलेख

विक्रम संवत् ६११

स्थान : उत्तर प्रदेश के बाराबंकी जिले में हड़ाहा के निकट के ग्राम से प्राप्त शिलाखण्ड पर उत्कीर्ण जो लखनऊ संग्राहलय में सुरक्षित है।

लिपि : छठी शताब्दी ईसवी की उत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : मौखरि राजा ईशानवर्मन् के पुत्र सूर्यवर्मन् द्वारा जंगल-स्थित एक पुराने शिव-मन्दिर का जीर्णोद्धार।

संदर्भ : हीरानन्द शास्त्री, EI, 14, pp. 110-120; सरकार, SI, p. 385; दिसकलकर, SSI, pp. 96-105,; दशरथ शर्मा, JOR, Madras, 9, 1935, pp. 78 ff; JNSI, 27, pt. 1, 1965, p. 103.

१. लोकाविष्कृति[1]-संक्षय-स्थिति-कृतां यः कारणं वेधसाम्[2] ध्वस्त-ध्वान्तचयाः परास्त-रजसो ध्यायन्ति यं योगिनः। यस्यार्द्ध-स्थित-योषितोपि[3] हृदये नास्थायि चेतो-भुवा भूतात्मा त्रिपुरान्तकः स

२. जयति श्रेयः-प्रसूतिर्भवः ॥ [१*] आशोणां फणिनः फणोपल-रुचा सैङ्घीं (सैंहीं) वसानं त्वचं शुभ्रां लोचन-जन्मना कपिशयद्भासा कपालावलीम् [।*] तन्वीं ध्वान्त-नुदं मृगाकृति-भृतो विभ्रत्कलां मौलिना दिश्यादन्ध-

---

१. सरकार पंक्ति के आरम्भ में १" चिह्न पढ़ते हैं।

२. °सां पढ़ें।

३. योषितेऽपि पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. क-विद्विषः स्फुरदिह स्थेयः पदं वो वपुः ।। [२*] सुत-शतं लेभे नृपोश्वपतिर्व्वैवस्वताद्यद्गुणोदितम् [।*] तत्प्रसूता दुरित-वृत्ति-रुधो मुखराः क्षितीशाः क्षतारयः ।। [३*]तेष्वापे हरिवर्म्मणावनिभुजा[1] भूतिर्भु-

४. वो भूतये ।[2] रुद्धाशेष-दिगन्तराल-यशसा रुग्णारि-संपत्त्विषा। सङ्ग्रामे हुतभुक्प्रभाकपिशितं वक्त्रं समीक्ष्यारिभिर्यो भीतैः (तैः) प्रणतस्ततश्च भुवने ज्वाला-मुखाख्यां गतः ।।[४।।*] लोकस्थितीनां स्थितये स्थि-

५. तस्य मवोरिवाचार-विवेक-मार्ग्गे। जगाहिरे यस्य जगन्ति रम्याः सत्कीर्त्तयः कीर्त्तयितव्य-नाम्नः ।।[५।।*] तस्मात्पयोधेरिव शीत-रश्मिरादित्यवर्म्मा नृपतिर्ब्बभूव । वर्ण्णाश्रमाचार-विधि-प्रणीतेर्यं प्राप्य

६. साफल्यमियाय धाता ।।[६।।*] हुतभुजि मख-मध्यासङ्गिनि ध्वान्त-नीलम्[3] वियति पवन-जन्म-भ्रान्ति-विक्षेप-भूयः । मुखरयति समन्तादुत्पतद्धूम-जालम्[4] शिखि-कुलमुरुमेघाशङ्कि यस्य

७. प्रसक्तम् ।।[७।।*]तेनापीश्वरवर्म्मणः क्षितिपतेः क्षत्र-प्रभावाप्तये ।[5] जन्माकारि कृतात्मनः क्क्रतु-गणेष्वाहूत-वृत्र-द्विषः । यस्योत्खात-कलि-स्वभाव-चरितस्याचार-मार्गं नृपा यत्नेनापि ययाति-

८. तुल्यशसो नान्ये[ऽ*]नुगन्तुं क्षमाः ।।[८।।*] नीत्या शौर्यं विशालं सुहृदमकुठि(टि)ने(ले)नोत्तमेच्छाङ्कुलेन[6] । त्यागं पात्रेण वित्त-

---

१. हीरानन्द शास्त्री एवं सरकार : तेष्वादौ हरिवर्म्मणो[ऽ*]वनिभुजो ।
२. विराम रेखा अनावश्यक ।
३, ४. °लं पढ़ें ।
५. पड़ी रेखा अनावश्यक है ।
६. हीरानन्द शास्त्री मकुटिलेनोत्तमुर्व्वी संशोधन सुझाते हैं जो अनावश्यक है । आगे की रेखा अनावश्यक है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रभवमपि हृ(ह्रि)या यौवन संयमेन [।*] वाचं सत्येन चेष्टां श्रुति-पथ-विधिना प्रश्रये-

९. णोत्तमर्द्धिम्[1] यो बध्नंनै (ध्नन्नै)व खेदं व्रजति कलिमय-ध्वान्त-मग्ने[ऽ*]पि लोके ।।[९।।*] यस्येज्यास्वनिशं यथा-विधि हुत-ज्योतिर्ज्वलज्जान्मना[2] धूमेनाञ्जन-भङ्ग-मेचक-रुचा दिक्चक्र-वाले तते । आयाता नव-

१०. वारि-भाक-विनमन्मेघावली प्रावृडित्युन्मादोद्धत-चेतसः शिखि-गणा वाचालतामाययुः[3] ।।[१०।।*] तस्मात्सूर्य्यं इवोदयाद्रिशिरसो धातुर्म्मरुत्वानिव क्षीरोदादिव तर्जितेन्दु-किरणः कान्तप्रभः कौस्तुभः [।*]

११. भूतानामुदपद्यत स्थिति-करः स्थेष्ठं महिम्नः पदम्[4] राजन्राजक-मण्डलाम्बर-शशी श्रीशानवर्म्मा नृपः ।।[११।।*] लोकानामुप-कारिणारि-कुमुद-व्यालुप्त-कान्ति-श्रिया ।[5] मित्रस्याम्बुरुहाग (क)रद्युतिकृता भूरि-

१२. प्रताप-त्विषा । येनाच्छादित-सत्पथं कलि-युग-ध्वान्तावमग्नञ्जग-त्सूर्येणेव समुद्यता कृतमिदं भूयः प्रवृत्तक्रियम् ।।[१२।।*] जित्वा[ऽऽ*]न्ध्राधिपतिं सहस्र-गणित-त्रेधा-क्षरद्वारणम्[6] व्यावल्गन्नियुताति-

१३. संख्य-तुरगान्भङ्क्त्वा रणे सूलिकाम्(न्)[।*]कृत्वा चायति-मौ(मो)चित-स्थल-भुवो गौडान्समुद्राश्रयानध्यासिष्ट नत-क्षितीश-चरणः सिङ्हासनं यो जिती ।।[१३।।*] प्रस्थानेषु बलार्णवाभि-गमन-क्षोभ-स्फुटद्भू तल-

---

१. ॰र्द्धि पढ़ें ।
२. रेखा अनावश्यक ।
३. सातवें श्लोक में भी ऐसा ही भाव प्रकट किया गया है ।
४. पदं पढ़ें ।
५. रेखा अनावश्यक है ।
६. ॰णं पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४. प्रोद्धू त-स्थगितार्क्क-मण्डल-रुचा दिग्व्यापिना रेणुना । यस्या-मूढ-दिनादि-मध्य-विरतौ लोके[ऽ*]न्धकारीकृते ।[1] व्यक्ति नाडिकयैव यान्ति जयिनो यामास्त्रियामास्विव ॥[१४॥*] प्रविशती कलि-मारुत-घट्टिता-

१५. क्षितिरलक्ष्य-रसातल-वारिधौ । गुण-शतैरवबध्य समन्ततः स्फुटित-नौरिव येन बलाद्धि(द्धृ)ता ॥[१५॥*] ज्याघात-व्रण-रूढि-कर्क्कश-भुजा व्याकृष्ट-शार्ङ्ग-च्युतान्यस्यावाप्य पतत्रिणो रणमुखे[2] प्राणानमुञ्च-

१६. न्द्विषः । यस्मिन्शासति च क्षितिं क्षिति-पतौ जातेव-भूयस्त्रयी ।[3] तेन ध्वस्त-कलि-प्रवृत्ति-तिमिरः श्री-सूर्य्यवर्म्मा[ऽ*]जनि ॥[१६॥*] यो बालेन्दु-सकान्ति कृत्स्न-भुवन-प्रेयो दधद्यौवनम्[4] शान्तः शास्त्र-विचारणा-

१७. हित-मनाः पारङ्कलानाङ्गतः । लक्ष्मी-कीर्त्ति-सरस्वती-प्रभृतयो यं स्पर्धयेवाश्रिता लोके कामित-कामि-भाव-रसिकः कान्ता-जनो भूयसा ॥[१७॥*] सद्वृत्तेन बलात्कलेरवनतिता[5](स्ता) वत्प्रवृद्धात्मनो वाणै-

१८. स्तावदवस्थितं स्मृति-भुवः कान्ता-शरीर-क्षतौ । लक्ष्म्या तावद-काण्ड-भङ्ग-भयं त्यक्तम्परापाश्रयम्[6] यावन्नाविरकारि यस्य जनता-कान्तं वपुर्व्वेधसा ॥ [१८॥*]लक्ष्म्यः[7] शत्रु-भुवः कुच-ग्रह-भयावेश-भ्रम-

---

१. रेखा अनावश्यक है ।
२. हीरानन्द शास्त्री : रणमखे ।
३. रेखा अनावश्यक है ।
४. °नं पढ़ें ।
५. सरकार : °नति (तं) ता° ।
६. °यं पढ़ें ।
७. लक्ष्मीः पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१९. ल्लोचना ।[1] येनाकृष्य भुजेन विस्फुरदसि-ज्योतिः-कणासङ्गिना[2] कान्ता मन्मथिनेव कामित-विदा गाढं निपीड्योरसा ।[3] प्रायेणान्य-मनुष्य-संश्रय-कृतं भावं परित्याजिता ।।[१९।।*] तेनानतोन्नति-कृता

२०. मृगया गतेन दृष्ट्वाद्यमन्धक-भिदो भवनं विशीर्ण्णम् [।*] स्वेच्छा-समुन्नतमकारि ललाम भूमेः क्षेमेश्वर-प्रथित-नाम शशाङ्क-शुभ्रम् ।। [२०।।*] एकादशातिरिक्तेतु षट्षु शातित-विद्विषि । शतेपु शरदां

२१. पत्यौ भुवः श्रीशानवर्म्मणि ।।[२१।।*] यस्मिन्काले [ऽ*]म्बुवाहा नव-गवल-रुचः प्रान्त-लग्नेन्द्र-चापास्तन्वन्त्याशा-वितानं स्फुरदुरु-तडितः सान्द्र-धीरं क्वणन्तः । वाताश्चावान्ति नीपान्नव-कुसुम-चयानभ्र-मूर्ध्नो

२२. धुनानास्तस्मिन्मुक्ताम्बु-मेघ-द्युति भवनमदो निर्म्मितं शूल-पाणेः ।।[२२।।*] कुमारशान्तेः पुत्रेण गर्ग्गराकट-वासिना । नृपानुरागा-त्पूर्व्वेयमकारि रविशान्तिना ।। [२३।।*] उत्कीर्ण्णा मिहिरवर्म्मणा[।।*]

---

१. विरामरेखा अनावश्यक है ।

२. सरकार : कलासङ्गिना ।

३. विरामरेखा अनावश्यक है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शर्ववर्मन् का असीरगढ़ मुद्रा अभिलेख

स्थान : यह अभिलेख मूलतः एक मुद्रा पर था जो लुप्त हो चुकी है। इसकी प्रतिकृति मध्यप्रदेश के बरहानपुर नगर से लगभग १७ किलोमीटर पूर्वोत्तर असीरगढ़ दुर्ग में महाराजा सिन्धिया की एक पेटी से प्राप्त हुई थी।

लिपि : उत्तरी ब्राह्मी। मात्राएं लम्बी और लहरिया हैं।

भाषा : संस्कृत।

विषय : मौखरि राजा शर्ववर्मन् की वंशावली का उल्लेख।

संदर्भ : प्रिंसेप, JASB, 5 p. 482; विल्सन, JRAS, 3, p. 377; फ्लीट, CII, III, No. 47.

पाठ

१ चतुस्समुद्रातिक्क्रान्त-कीर्त्तिः प्रतापानुरागोपनतान्यराजा(जो) वर्णाश्रम-व्यवस्था-

२. पन-प्रवृत्तचक्क्रश्चक्क्रधर इव प्रजानामर्त्तिहर[:*] श्रि(श्री)-महाराज-हरिवर्म्मा [।।*] तस्य

३. पुत्रस्तत्पादानुद्ध्या[ा*]तो जयस्वामिनि-भट्टारिका-देव्य[ा*]-मुत्पन्नः श्री-महाराजादित्यव-

४. र्म्मा [।।*] तस्य पुत्रस्तत्पादानुद्ध्यातो हर्षगुप्ता-भट्टारिका-देव्या-मुत्पन्नः श्री-मह[ा*]रा-

५. जेश्वरवर्म्मा [।।*] तस्य पुत्रस्तत्पादानुद्ध्यात उपगुप्ता[1]-भट्टारिका-देव्यामुत्पन्नो

---

१. चार्ल्स विल्किन्स ने इसे 'उमागुप्ता' पढ़ा। परन्तु जैसा कि फ्लीट ने कहा है यद्यपि इस लेख में प्रयुक्त हुए 'म' तथा 'प' बहुत समान हैं फिर भी इस स्थल का अक्षर 'प' ही है और फिर 'आ' की मात्रा तो इस अक्षर पर है ही नहीं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. मह[ा*]राजाधिराज-श्रि(श्री)-ईशान[१]वर्म्मा [।।*] तस्य पुत्र-स्तत्पादानुद्ध्यातो ल(?)क्ष[म][२]ीव-

७. [त]ी-भट्टारिका-मह[ा*]देव्यामुत्पन्न परममा[३]हेश्वरा[रो] म[४]-

८. हाराजाधिराज-श्री-शर्व्ववर्म्मा मौखरिः [।।*]

---

१. श्रीशान° पढ़ें ।

२. फ्लीट का अनुमान । 'म' मूल में उत्कीर्ण नहीं है ।

३. यह अक्षर स्पष्ट नहीं है ।

४. 'म' का केवल बायाँ बाजू दिखता है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनन्तवर्मन् का बराबर गुहा अभिलेख

स्थान : बिहार में गया नगर से लगभग २२ किलोमीटर पूर्वोत्तर को पनारी ग्राम के निकट 'बराबर' पहाड़ी की लोमश ऋषि गुहा के प्रवेश द्वार पर उत्कीर्ण।

लिपि : उत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : मौखरि राजा अनन्तवर्मन् द्वारा प्रवरगिरि (बराबर पहाड़ी) की गुहा में भगवान कृष्ण की प्रतिमा की स्थापना तथा अपने पिता शार्दूलवर्मा-का यशोवर्णन।

संदर्भ : प्रिंसेप, JASB, 6, p. 674; भगवानलाल इन्द्रजी, IA, 13, p. 428, नोट 55; फ्लीट, CII, III, No. 48.

१. ॐ[1][।।*] भूपाना[ं*] मौखरीणां कुलमतनुगुणोलंचकारात्मजात्या[2]।[3] श्री-शार्दूलस्य यो[4]भूज्जनहृदयहरो[5]नन्तवर्म्मा सुपुत्त्रः[।*]

२. कृष्णस्याकृष्णकीर्त्तिः प्रवरगिरि-गुहा-संश्रितं विंवमेतत्[6] मूत्त लोके यश[:*] स्वं रचितुमिव मुदाचीकरत्कान्तिमत्सः ।।

---

१. मूल लेख में 'ॐ' का चिह्न तीसरी पंक्ति के सम्मुख प्रान्त में उत्कीर्ण है।

२. °गुणोऽलंचकार पढ़ें।

३. यह अर्ध-विराम अनावश्यक है।

४. योऽभूज्ज° पढ़ें।

५. °हारोऽनन्तवर्म्मा पढ़ें।

६. बिंबमेतत् पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. कालः शत्त्रु महीभुजां प्रणयिणां[1] इच्छाफलः पादपो ।[2]
दीपः क्षत्त्रकुलस्य नैक-समर-व्यापार-शोभावतः [।*]

४. कान्ता-चित्त-हरः स्मरप्रतिसमः पाता व(व) भूव क्षितेः
श्री-शार्दू ल इति प्रतिष्ठित-यशा[ः*] सामन्तचूडामणिः ॥

५. उत्पक्ष्मान्तविलोहितोरुतरलस्पष्टेष्टतारां रुषा ।[3]
करोति विषमां यत्त्र स्वदृष्टिं रिपो(पौ) ।

६. तत्त्राकर्ण्ण-विकृष्ट-शार्ङ्ग-शरधि-व्यस्तशरोत्त(न्त)ावहः
तत्पुत्त्रस्य पतत्यनन्तसुखदस्यानन्तवर्म्मश्रुतेः ॥

---

१. प्रणयिणाम् पढ़ें ।

२, ३. ये दोनों अर्ध-विराम चिह्न अनावश्यक हैं ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनन्तवर्मन् का नागार्जुनी (उत्तरी) गुहा अभिलेख

स्थान : बिहार में गया नगर से लगभग २४ किलोमीटर पूर्वोत्तर को जाफरा ग्राम के निकट नागार्जुनी पहाड़ी की एक उत्तरी गुहा के मस्तक पर उत्कीर्ण। इसके निकट अशोक के पौत्र दशरथ का अभिलेख भी उत्कीर्ण है।

लिपि : उत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : अनन्तवर्मन् द्वारा गुहा के अन्दर भूतपति (शिव) तथा देवी (पार्वती) की संयुक्त (अर्धनारीश्वर) प्रतिमा की स्थापना।

संदर्भ : राजेन्द्रलाल मित्र, JASB, 16, p. 594; फ्लीट, CII, III, No. 49.

१. ॐ[१] [।।*] आसीतमहीक्षितामनुरिव[२] क्षत्त्रस्थितेर्द्देशिकः
श्रीमान्मत्त-गजेन्द्र-खेल-गमनः श्री-यज्ञवर्म्मा नृपः [।*]

२. यस्याहूत-सहस्रनेत्र-विरह-क्षामा सदैवाध्वरैः
पौलोमी चिरमश्रुपातमलिनां धा[३](ध]त्ते कपोलश्रियं[४] ।। [१*]

३. श्री-शार्दूल-नृपात्मजः परहितः श्री-पौरुषः श्रूयते ।[५]
लोके चन्द्र-मरीचि-निर्म्मल-गुणो योनन्तवर्म्माभिधा(ध): [।*]

४. दृष्टादृष्ट-विभूति कर्तृ-वरदं तेनाद्भुतं कारितं ।[६]
विम्वं[७] भूतपतेर्गुहाश्रितमिदं देव्याश्च पायाज्जगत् ।। [२*]

---

१. ॐ का चिह्न तीसरी पंक्ति के सम्मुख प्रान्त में उत्कीर्ण है।

२. चार्ल्स विल्किन्स तथा राजेन्द्रलाल मित्र : °महीक्षितां मनुरिव। मूल में अनुस्वार नहीं है।

३. फ्लीट जिसे आ की मात्रा पढ़ते हैं वह विसर्ग प्रतीत होता है।

४. °श्रियम् पढ़ें।

५, ६. दोनों स्थानों पर अर्धविराम का चिह्न अनावश्यक है।

७. बिम्बं पढ़ें।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५. अन्सान्ताकृष्ट[1]-शाङ्गं-प्रवितत-सशर-ज्या-स्फुरन्मण्डलान्तव्यक्त[2]-
भ्रूभङ्ग-लक्ष्म-व्यतिकर-शवलाखण्ड-वक्त्रेन्दु-विम्व[:*][3] ।

६. अन्तायानन्तवर्म्मा स्मर-सदृश-वपुर्ज्जीविते नि[:*]स्पृहाभिः
दृष्ट[:*] स्थित्वा मृगीभिः सुचिरमनिमिष-स्निग्धमुग्धे-
क्षणाभिः ।।[३*]

७. अत्याकृष्टात्कुरर-विरुत-स्पर्द्धिनः शाङ्गं-यन्त्राद्वेगाविद्धः प्रवितत-
गुणादीरितः सौष्ठवेन ।

८. दूरप्रापी विमथित-गजोद्भ्रान्त-वाजी प्रवीरो वाणोरि[4]-स्त्री-
व्यसन-पदवी-देशिकोनन्तनाम्ना(म्न): ।।[४*]

---

१. अंस॰ पढ़ें ।
२. व्यक्त के आगे लगा अर्धविराम चिह्न अनावश्यक है ।
३. बिम्ब : पढ़ें ।
४. वाणोऽरि पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनन्तवर्मन् का नागार्जुनी (दक्षिणी) गुहा अभिलेख

स्थान : विहार में गया नगर से लगभग २४ किलोमीटर पूर्वोत्तर को जाफरा ग्राम के निकट नागार्जुनी पहाड़ी की एक दक्षिणी गुहा के प्रवेश द्वार पर उत्कीर्ण ।

लिपि : उत्तरी ब्राह्मी ।

भाषा : संस्कृत :

विषय : अनन्त वर्मन् द्वारा कात्यायनी नाम से पार्वती की एक मूर्त्ति की स्थापना तथा भवानी नाम से उसी देवी के लिए एक गांव का दान। गांव का नाम लेख में मिटा दिया गया है ।

सदर्भ : फलीट, CII, III, N0. 50.

१. ओम् [।।*] उन्निद्रस्य सरोरुहस्य सकलामाक्षिप्य शोभां रुचा ।[१]
सावज्ञं महिषासुरस्य शिरसि न्यस्तः क्वणन्नूपुरः ।

२. देव्या वः स्थिरभक्तिवादसदृशीं युञ्जन्फलेनार्थितां । दिश्या-
दच्छनखाङ्शुजाल-जटिलः पादः पदं संपदां ।। [१*]

३. आसीदिष्टसमृद्धयज्ञमहिमा श्रीयज्ञवर्म्मा नृपः । प्रख्याता (तो)
विमलेन्दुनिर्म्मलयशा [:*] क्षात्त्रस्य धाम्नः पदं ।

४. प्रज्ञानान्वयदानविक्क्रमगुणैर्यो राजकस्याग्रणी[:*] भूत्वापि प्रकृति-
स्थ एव विनयादक्षोभ्यसत्[त्*]वोदधि [:*] ।। [२*]

५. तस्योदीर्णमहार्णवोपमरणव्यापारलव्य(ब्धं) यशः [।*] तन्वानः
ककुदं सुखेषु ककुभं कीर्त्[त्*]या जितेदंयुगः [।*]

---

१. प्रथम और तृतीय पादों के अन्त में अनावश्यक विराम चिह्न ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. श्रीमान्व(ब)न्धुसुहृज्जन प्रणयिनामाशाः फलैः पूरय[न्*]।
पुत्त्रः कल्पतरोरिवाप्तमहिमां[1] शार्दूलवर्म्मा नृपः ।। [३*]

७. तस्यानन्तमनन्तकीर्त्तियशसोऽनन्तादिवर्म्माख्यया । ख्यातेनाहित-
भक्तिभावितधिया पुत्त्रेण पूतात्मना [।*]

८. आसूर्यक्षितिचन्द्रतारकमियं पुण्यास्पदं वाञ्च्छ(ञ्छ)ता । विन्य-
स्ताद्भुताविन्ध्यभूधरगुहामाश्रित्य कात्यायनी ।। [४*]

९. धौताङ्होमलपङ्कदोषममलैर्माहानदैरम्वु(म्बु]भिः । व्याधूतोपवन-
प्रियङ्गुवकुलैरामोदितं वायुभि [ः*।]

१०. कल्पान्तावधिभोग्यमुच्चशिखरिच्छायावृतार्क्कद्युति । [- -] ग्राम-
मनल्पभोगविभवं रम्यं भवान्यै ददौ ।।[५*]

---

१. °महिमा पढ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हर्षवर्धन का बाँसखेड़ा ताम्र-पट्ट अभिलेख

हर्ष संवत् २२

स्थान : उत्तरप्रदेश में शाहजहानपुर से लगभग ४० किलोमीटर दूर बाँसखेड़ा ग्राम से प्राप्त ताम्र-पट्ट पर उत्कीर्ण।

लिपि : पश्चिमोत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : महाराज हर्षवर्धन द्वारा बालचन्द्र एवं भद्रस्वामी नामक ब्राह्मणों को अहिच्छत्रा भुक्ति के अन्तर्गत मर्क्कटसागर ग्राम का दान।

संदर्भ : ब्यूलर, EI, 4, pp. 208-211; दिसकलकर, SSI, pp. 129-36.

१. श्री[1] स्वस्ति]॥*] महानौ-हस्त्यश्व-जयस्कन्धावाराच्छ्रीवर्द्धमान-कोटचा महाराज-श्री-नरवर्द्धनस्तस्य पुत्रस्ततपादानुध्यातश्श्री-वज्रिणीदेव्यामुत्पन्न ‿ परमादित्य-भक्तो महाराज-श्री-राज्य-वर्द्धनस्तस्य पुत्रस्ततपादानु-

२. ध्यातश्श्रीमदप्सरोदेव्यामुत्पन्न ‿ परमादित्य-भक्तो महाराज-श्रीमदादित्यवर्द्धनस्तस्य पुत्रस्ततपादानुध्यातश्श्री-महासेनगुप्ता-देव्यामुत्पन्नश्चतुस्समुद्रातिक्रान्तकीर्त्ति ‿ प्रतापानुरागोप-

३. नतान्यराजो वर्णाश्रमव्यवस्थापनप्रवृत्तचक्र एकचक्ररथ इव प्रजानामर्त्तिहर[2] ‿ परमादित्यभक्त ‿ परमभट्टारकमहाराजा-धिराज-श्री-प्रभाकरवर्द्धनस्तस्य पुत्रस्ततपा[दा]-

४. नुध्यातस्सितयश ‿ -प्रतान-विच्छुरित-सकल-भुवनमण्डल ‿ परि-गृहीत-धनद-वरुणेन्द्र-प्रभृति-लोकपाल-तेजास्सत्पथोपार्ज्जिता-नेक-द्रविण-भूमि-प्रदान स[*]-प्रीणितार्थिहृदयो-

---

१. चिह्न मात्र।

२. ब्यूलर : 'मार्त्तिहर'।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५. [ऽ*]तिशयित-पूर्व्वराज-चरितो देव्याममलयशोमत्यां श्री-
यशोमत्यामुत्पन्न॒परमसौगतस्सुगत इव परहितैकरत॒परम-
भट्टारक-महाराजाधिराज-श्री-राज्यवर्द्धनः [।*] राजानो युधि दु-

६. ष्ट-वाजिन इव श्री-देवगुप्तादय ×कृत्वा येन कशाप्रहार-
विमुखास्सर्व्वे समं संयताः । उत्खाय द्विषतो विजित्य वसुधा-
ङ्कृत्वा प्रजानां प्रियं प्राणानुज्झितवानराति-भवने सत्यानुरोधेन
यः । [।।१*] तस्या-

७. नुजस्तत्पादानुध्यात॒परम-माहेश्वरो महेश्वर इव सर्व्व-
सत्वा[१]नुकम्पी परम-भट्टारक-महराजाधिराज-श्री-हर्षः अहि-
च्छत्रा-भुक्तावङ्गदीय-वैषयिक-पश्चिम-पथक-सम्व(म्ब)[द्ध]-
मर्क्कट-सा-

८. गरे [स]मुपगतान्महासामन्त-महाराज-दौस्साधसाधनिक-
प्रमातार-राजस्थानीय-कुमारामात्योपरिक-विषयपति-भट-चाट-
सेवकादीन्प्रतिवासि-जानपदांश्च समाज्ञापय[ि]त वि[दि]तम-

९. [स्तु] यथायमुपरि लिखित-ग्रामस्स्वसीमा-पर्य्यन्तस्सो-
द्रङ्गस्सर्व्व-राज-कुलाभाव्य-प्रत्याय-समेतस्सर्व्व-परिहृत-परिहारो
विषयादुद्धृतपिण्ड॒पुत्त्र-पौत्त्रानुगश्चन्द्रावर्क-क्षिति-समका-

१०. [ली]नो भूमिच्छिद्र-न्यायेन मया पितु॒परम-भट्टारक-
महाराजाधिराज-श्री-प्रभाकरवर्द्धन-देवस्य मातुर्भट्टारिका-
महादेवी-राज्ञी-श्री-यशोमतीदेव्या ज्येष्ठ-भ्रातृ-परमभट्टारक-

११. महाराजाधिराज-श्री-राज्यवर्द्धनदेव-पादानाञ्च पुण्य-यशो
[ऽ*] भिवृद्धये भरद्वाज-सगोत्र-व(ब)हृवृचच्छन्दोग-सव्र(ब्र)ह्म-
चारिभट्ट-वा(बा)लचन्द्र[२]-भद्रस्वामिभ्यां प्रतिग्रह-धर्म्मेणा[ऽ*]-
ग्रहारत्वेन प्रतिपा-

---

१. 'सत्वा' पढ़ें ।
२. बालचन्द्र व भद्रस्वामी के नामों को पृथक दिखाने के लिए उनके बीच चिह्न उत्कीर्ण है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१२. दितो विदित्वा भवद्भिस्समनुमन्तव्य॒प्रतिवासि-जान-पदैर-
प्याज्ञा-श्रवण-विधेयैर्भूत्वा यथा समुचित-तुल्य-मेय-भाग-भोग-
कर-हिरण्यादि-प्रत्याया एतयोरेवोपनेया स्सेवोपस्थान[ञ्च]क-

१३. रणीयमित्यपि (मिति । अपि) च । अस्मत्कुलक्क्रममुदाहर-
द्भिरन्यैश्च दानमिदमभ्यनुमोदनीयं[1] । लक्ष्म्यास्तडित्सलिल-
बुद्-बुद[2]-चञ्चलाया दानं फलं परयश॒परिपालनञ्च ।।[२*]
कर्म्मणा म-

१४. नसा वाचा कर्त्तव्यं प्राणिभिर्हितं (तम्) । हर्षेणैतत्समाख्यात-
न्धर्म्मार्ज्जनमनुत्तमं[3][।।३*] दूतको[ऽ*]त्र महाप्रमातार-
महासामान्त-श्री-स्कन्दगुप्तः महाक्षपटलाधिकृत-महासामन्त-म-

१५. हाराज[भानु]समादेशादुत्कीर्ण्णं[4]

१६. ईश्वरेणेदमिति सम्वत्[5] २० २

१७. कार्ति[6] व दि १ [।*]

१८. [7]स्वहस्तो मम महाराजाधिराज-श्री-हर्षस्य [।।*]

---

१. °यम् पढ़ें ।
२. बुद्बुद पढ़ें ।
३. °मम् पढ़ें ।
४. °र्णम् पढ़ें ।
५. संवत् पढ़ें ।
६. कार्तिक पढ़ें ।
७. यह पंक्ति १६-१७ के सम्मुख है । इसके अक्षर शेष अभिलेख के अक्षरों से बड़े व अलंकृत हैं ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हर्षवर्धन का मधुबन ताम्र-पट्ट अभिलेख

हर्ष संवत् २५

स्थान : उत्तरप्रदेश के आजमगढ़ जिले में मधुबन ग्राम से प्राप्त एक ताम्र-पट्ट पर उत्कीर्ण ।

लिपि : पश्चिमोत्तरी ब्राह्मी ।

भाषा : संस्कृत ।

विषय : महाराज हर्षवर्धन द्वारा श्रावस्ति भुक्ति के कुण्डधानी विषय में सोमकुण्डका ग्राम का कूट दान-पत्र के आधार पर इसे भोगने वाले वामरथ्य नामक ब्राह्मण से छीनकर, वातस्वामी तथा शिवदेवस्वामी नामक दो अन्य ब्राह्मणों को दान।

संदर्भ : कीलहॉर्न, EI, 7, p. 155.

१. ॐ[1] स्वस्ति [।।*] महा-नौ-हस्त्यश्व-जयस्कन्धावारात्कपित्थि-काया: महाराज-श्री-नरवर्द्धनस्तस्य पुत्रस्तत्पादानुध्यात: श्री-वज्रिणी-देव्यामुत्पन्न: परमादित्य-भक्तो-

२. महाराज-श्री-राज्यवर्द्धनस्तस्य पुत्रस्तत्पादानुध्यात: श्री-अप्सरो-देव्यामुत्पन्न: परमादित्य-भक्तो महाराज-श्रीमद(दा)दित्यवर्द्धन-स्तस्य पुत्रस्तत्पादानुध्यात: श्री-महा-

३. सेनगुप्ता-देव्यामुत्पन्नश्चतुस्समुद्रातिक्क्रान्त-कीर्त्तिः प्रतापानुरागो-पनतान्य-राजा(जो) वर्णाश्रम-व्वयस्थापन-प्रवृत्त-चक्र एक-चक्क्र-रथ इव प्रजानामार्ति-हर:

---

१. चिह्न मात्र ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४. परमादित्य-भक्तः परम-भट्टारक-महाराजाधिराज-श्री-प्रभाकर-वर्द्धनस्तस्य पुत्रस्तत्पादानुध्यातः सित-यशः-प्रतान-विच्छुरित-सकल-भुवन-मण्डलः परिगृहीत-

५. धनद-वरुणेन्द्र-प्रभृति-लोकपाल-तेजाः सत्पथोपार्ज्जितानेक-द्रविण-भूमि-प्रदान-सम्प्रीणितार्थि-हृदयो[ऽ*]तिशयित-पूर्व्वराज-चरितो देव्याममल-यशोमत्यां

६. श्री-यशोमत्यामुत्पन्नः परम-सौगतः सुगत इव परहितैक-रतः परम-भट्टारक-महाराजाधिराज-श्री राज्यवर्द्धनः [।*] राजानो युधि दुष्ट-वाजिन इव श्री-देवगुप्ता-

७. दयः कृत्वा येन कशा-प्रहार-विमुखाः सर्व्वे समं संयताः [।*] उत्खाय द्विषतो विजित्य वसुधां कृत्वा प्रजानां प्रियं प्राणानुज्झि-तवानराति-भवने सत्यानुरोधेन यः [॥१॥*] तस्यानुज-

८. स्तत्पादानुध्यातः परम-माहेश्वरो महेश्वर इव सर्व्व-सत्वा(त्त्वा)-नुकम्पी परम-भट्टारक-महाराजाधिराज-श्री-हर्षः श्रावस्ती-भुक्तौ कुण्डधानी-वैषयिक-सोमकुण्डका-ग्रामे

९. समुपगतां(तान्) महासामन्त-महाराज-दौस्साध-साधनिक-प्रमा-तार-राजस्थानीय-कुमारामात्योपरिक-विषयपति-भट-चाट-सेवका-दीन्प्रतिवासि-जनपदा(दां)श्च समा-

१०. ज्ञापयत्यस्तु वः सम्वि(संवि)दितं(त)मयं सोमकुण्डका-ग्रामो व्रा(ब्रा)ह्मण-वामरथ्येन कूट-शासनेन भुक्तक इति विचार्य यतस्तच्छासनं भङ्क्त्वा तस्मादाक्षिप्य च स्व-सीमा-

११. पर्य्यन्तः सोद्रङ्गः सर्व्व-राजकुलाभाव्य-प्रत्याय-समेतः सर्व्व-परिहृत-परिहारो विषयादुद्धृत-पिण्डः पुत्र-पौत्रानुगः चन्द्रार्क्क-क्षिति-समकालीनो

१२. भूमिच्छिद्र-न्यायेन मया पितुः परम-भट्टारक-महाराजाधिराज-श्री-प्रभाकरवर्द्धनदेवस्य मातुः परम-भट्टारिका-महादेवी-राज्ञी-श्री-यशोमती-देव्याः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१३. ज्येष्ठ-भ्रातृ-परमभट्टारक-महाराजाधिराज-श्री-राज्यवर्द्धनदेव-पादानां च पुण्य-यशोभिवृद्धये सावर्ण्णि-सगोत्र-च्छन्दोग-सब्र(ब्र)-ह्मचारि-भट्ट-वातस्वामि-

१४. विष्णुवृद्ध-सगोत्र-व(ब)ह्वृच-सब्र(ब्र)ह्मचारि-भट्ट-शिवदेव-स्वामिभ्यां प्रतिग्रह-धर्म्म(र्म्मे)णाग्रहारत्वेन प्रतिपादितः [।*] विदित्वा भवद्भिः समनुमन्तव्यः प्रति-

१५. वासि-जनपदैरप्याज्ञा-श्रवण-विधेयैर्भूत्वा यथासमुचित-तुल्य-मेय-भाग-भोग-कर-हिरण्यादि-प्रत्याया अनयोरेवोपनेयाः सेवोपस्थानं च करणीयमित्य(ति । अ)-

१६ पि च ।। अस्मत्कुल-क्रममुदारमुदाहरद्भिरन्यैश्च दानमिदमभ्यनुमोदनीयं[1] [।*] लक्ष्म्यास्तडित्सलिल-बुद्बु(बुद्बु)द-चंचलायाः दानं फलं पर-यशः-परिपालनं च ।।[२।।*]कर्म्मणा

१७. मनसा वाचा कर्त्तव्यं प्राणिने हितं[2] [।*] हर्षेणैत[त्*]समाख्यातं धर्म्मार्ज्जनमनुत्तमं[3] ।। [३।।*] दूतकोत्र महासामन्त-श्री-स्कन्दगुप्तः[।*] महाक्षपटलाधिकरणाधि-

१८. कृत-सामन्त-महाराजेश्वरगुप्त-समादेशाच्चोत्कीर्ण्णं गर्ज्जरेण [।।*] सम्वत् (संवत्) २० ५ मार्ग्गशीर्ष-वदि ६ [।।*]

---

१. °यम् पढ़ ।
२. हितम् पढ़ ।
३. °मम् पढ़ें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शशाङ्क-कालीन मिदनापुर ताम्र-पट्ट अभिलेख

स्थान : बंगाल के मिदनापुर जिले के कलेक्टर बी. आर. सेन द्वारा १६३७ में किसी व्यक्ति से प्राप्त दो ताम्र-पट्टों पर उत्कीर्ण जिनका प्राप्ति-स्थान अज्ञात है।

लिपि : छठी-सातवीं शताब्दी की पूर्वोत्तरी ब्राह्मी।

विषय : प्रथम पट्ट में राजा शशाङ्क के अधीन दण्डभुक्ति तथा उत्कल के शासक सामन्त सोमदत्त द्वारा भट्टेश्वर नामक ब्राह्मण को महाकुम्भार-पद्रक ग्राम का दान।

द्वितीय पट्ट में दाम्यस्वामी नामक ब्राह्मण को कुम्भारपद्रक ग्राम में कुछ भूमि का दान।

संदर्भ : रमेशचन्द्र मजुमदार, JRASB (L), II, 194८, pp. 1-9.

(प्रथम पट्ट)

१. [स]म्वत् १० ६ भाद्र दि १० ६ [।।*] विष्णोः पोत्त्राग्र-वि-
क्षेप-क्षणभा[वित-साध्वसां(साम्)। शेषा][1]-

२. शेष-शिरो-मध्यमध्यासीन-महा-तनुं (नुम्) ।।[१*] कामाराति-
शिरोभ्रष्ट-[गङ्गौघ-ध्वस्त][2]-

३. कल्मषां (षाम्) [।*] श्री-शशाङ्के महीं पाति चतुर्जलधि-मेखलां
(लाम्) ।।[२*] तस्य पाद-न[ख-ज्योत्स्ना][3]-

४. विभूषित-शिरोमणौ[।*] श्री-सामन्त-महाराज-सोमदत्ते गुणाधि-
के ।।[३*] स[र्व-शास्त्रा][4]-

५. गमात्सन्न-कालेय-ध्वान्त-संहतौ [।*] सहितामुत्कल-देशेन दण्ड-
भुक्ति प्रशा[सति।।] [४*]

१, २, ३. रमेशचन्द्र मजुमदार का अनुमान।

४. सरकार का अनुमान : स[त्व-समा]-।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. सत्य-शौर्य-कृतास्त्रत्व-रूप-विद्यादयः पृथक् [।*] पाण्डवेषु स्थिताः सन्ति य[स्मि]-

७. न्नेकत्र ते गुणाः ॥[५*] अमात्यो यस्य गुणवान्प्रकीर्ण्णदास इति श्रुतः [।*] साधुकारि-

८. तया नित्यं यः पूज्यैः पूज्यते द्विजैः ॥[६*] अगामिनो नृपान्सर्व्वान् ज्ञापयित्वा

९. प्रणम्य च [।*] प्राह तावीरकं सर्व्वं कारणं लोकसंगतं (तम्)॥ [७*] भूमेर्गोचर्म-मात्रा[या]

१०. दाने स्वर्गः फलं स्मृतं (तम्) पराशर-सुतस्योच्चैर्व्वाचं श्रुत्वेति भाषितं (तम्) ॥ [८*] तेने[दञ्च]

११. समाम्नात[*] मनु-शास्त्रानुवर्त्तिना [।*] श्री-सामन्तेन कृतिना सोमदत्ते[न]

१२. धीमता ॥[९*] भट्टेश्वराय गुणिने काम्यपायाध्वर्यवे [।*] मु(म)हा (?) कुम्भारपद्रको

१३. दत्तः सर्व्व-मण्डल-वर्जित[ः*] ॥ [१०*] तद्योत्रास्मत्कुले जातो मोहादन्यो[ऽ*]पि वा [नरः] [।*]

१४. पापं प्रकुरुते लोभान्महा-पातकवान्भवेत् ॥ [११*] सुखाना-मन्व ....

१५. ......स्यात्याल्य-धीमतः [।*] द्विजदेवस्य माहेतो श्लोकाः स(?) ....सहिता[२]

(द्वितीय पट्ट)

१. [स]म्वत् ८ पौष दि १० २ अस्मिन्दिवस-मास-सम्वत्सरे ॥ विष्णोः पुत्राग्र-विक्षे-

---

२. रमेशचन्द्र मजूमदार का अनुमान ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२. प-क्षण-भावित-साध्वसां [।*] शेषाशेष-शिरोमध्यमध्यासीन-महातनु (नुम्) ।। [१*] कामारा-

३. ति-शिरो-भ्रष्ट-गङ्गौघ-ध्व[स्त*]कल्मषां (षाम्) [।*]श्री-शशाङ्के महीम्पाति चतुर्ज्जलधि-मेखलां (लाम्)[।।२*]

४. यस्य गाम्भीर्य-लावण्य-व (ब)हु-रत्नतया[ऽ*]नया[।*] न समः क्षारकालुष्य-व्यालोपय-

५. तयोदधि[1][:*]।।[३*] तस्य पाद-नख-ज्योत्स्ना-विभूषित-शिरोमणौ [।*] श्रीमान्महाप्रति (ती)-

६. हारे शुभ-कीर्त्तौ विचक्षणेः[2] ।।[४*] दण्ड-भुक्तिमिमां पाति पितृवत्पाप-वर्जिते [।*]

७. धर्म-शास्त्रानुरोधेन न्यायान्यायं विचेतरि ।।[५*] अस्यां तावीर-करणं विप्र-प्र-

८. धान-सङ्गतं(तम्)[।*] भविद्वर्त्तमानाधीन्विज्ञापयति सुनृतं (तम्)।। [६*] क्रीत्वा]ऽ*]स्मत्तो

९. यथा-न्यायं शुभकीत्तिरे (र)यं[3] वु (बु)धः [।*]चत्वारिङ्श (रिंश) द्दौ द्रोणान्द्रोणवापं च

१०. वास्तुना ।।[७*] केत(?)पद्रकोद्द शे[4] ग्रामे कुम्भारपद्रके [।*] भरद्वाज-सगोत्रा-

---

१. सरकार : क्षर-कालेप्यालो[पाङ्ग*]तयोदधि[:*] ।
२. विसर्ग अनावश्यक ।
३. मजुमदार का संशोधन : °रिमं ।
४. मजुमदार का संशोधन °कदेशे अनावश्यक। तुलना करें—कुमारगुप्त (प्रथम) का दामोदरपुर ताम्र-पट्ट अभिलेख (वर्ष १२४) पंक्ति ११ में उत्तर-पश्चिमोद्देशे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

११. य माध्यन्दिनाय धीमते [॥८*] दाम्यस्वामिन एतस्मै पित्रो[:*] पुण्याभिवृद्धये [॥९*][1]

१२. तद्यो वा [ऽ*[स्मद् कुले जातो मोहादन्यो [ऽ*]पि वा नरः [।*] पापं प्रकुरुते मोहान्मह-

१३. [त्पा*]तकवान्भवेत्[2] ॥ [१०*]

---

१. श्लोक का पूर्वार्द्ध छूट गया है।

२. यह पंक्ति ताम्र-पट्ट के दूसरी ओर उत्कीर्ण है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुलिकेशी (द्वितीय) का एहोळे अभिलेख

शक संवत् ५५६

स्थान : कर्णाटक प्रदेश में बीजापुर जिले के एहोळे ग्राम के मेगुटि मन्दिर की पूर्वी पार्श्व-भित्ति पर उत्कीर्ण ।

लिपि : दक्षिणी ब्राह्मी ।

भाषा : संस्कृत ।

विषय : चालुक्य राजा पुलिकेशी (द्वितीय) के आश्रित कवि रविकीर्ति द्वारा अपने आश्रयदाता के वीरचरितों का वर्णन तथा उसके वंश की प्रशस्ति एवं जैन मन्दिर का निर्माण ।

संदर्भ : **फ्लीट**, IA, 5, p. 67 ff; 8, pp. 237 ff; AS WI, 3, pp. 129 ff; **कीलहॉर्न**, EI, 6, pp.1-12 ff; **दिसकलकर**, SSI, pp. 137-58.

१. जयति भगवान्जि(ञ्जि)नेन्द्रो [वी]त-ज[रा-म]रण-जन्मनो यस्य [।*] ज्ञान-समुद्रान्तर्ग्ग[त]मखिलञ्जगदन्तरीपमिव । [।१*] तदनु चिरमपरि[मे]यश्चलुक्य-कुल-विपुल-जलनिधिर्ज्जयति ।। (।) पृथिवी-मौलि-ललाम्नां य‿प्रभव‿पुरुष-रत्नानाम्। ।। [२*] शूरे विदुषि च विभजन्दानम्मानञ्च युगपदेकत्र ।। (।)

२. अविहित-यथा-सं[ख्यो] [ज]यति च सत्याश्रयस्सुचिरस् ।। [३*] पृथिवी-वल्लभ-शब्दो येषामन्वर्थताञ्चिरञ्जातः (ञ्चिरंयातः) [।*] तद्वंशेषु जिगीषिषु बहुष्वप्यतीतेषु ।। [४*] नाना-हेति-पतित-भ्रान्ताश्व-पत्ति-द्विपे नृत्यद्भीम-कव(ब)न्ध-खड्ग-किरण-ज्वाला-सहस्र(स्रे)रणे [।*]

३. लक्ष्मीर्भावित-चापला[ऽ*]पि च कृता शौर्य्येण येनात्मसात्(द्)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राजा [ऽऽ]सीज्जयसिङ्ह-वल्लभ इति ख्यातश्चलुक्यान्वयः ॥[५*]
तदात्मजो [ऽ*] भूद्रणराग-नामा दिव्यानुभावोजगदेक-नाथः [।*]
अमानुषत्वं किल यस्य लोकस्सुप्तस्य जानाति वपु-प्रकर्षात्।[६*]
तस्याभवत्तनूज-पोलेकेशि(शी)य[:] श्रितेन्दु-कान्तिरपि[।*]

४. श्री-वल्लभो [ऽ*] प्ययासीद्वातापिपुरी-वधू-वरताम् ॥ [७*]
यत्त्रिवर्ग्ग-पदवीमलं क्षितौ नानुगन्तुमधुना[ऽ*]पि राजकम् [।*]
भूश्च येन हयमेध-याजिना प्राप्तावभृथ-मज्जना बभौ [॥८*]
नळ-मौर्य्य-कदम्ब-काळ-रात्रि:(त्रि-)स्तनयस्तस्य बभूम(व)
कीर्त्तिवर्म्मा[।*] पर-दार-निवृत्त-चित्त-वृत्ते-रपि धीर्यस्य रिपु-श्रि-

५.. या[ऽ*]नुकृष्टा ॥ [९*] रण-पराक्रम-लब्ध-जय-श्रिया सपदि येन
विरुग्न(ग्ण)मशेषतः [।*] नृपति-गन्धगजेन महौजसा पृथु-कदम्ब-
कदम्ब-कदम्बकम् [॥१०*] यस्मिन्सुरेश्वर-विभूति-गताभिलाषे
राजा[ऽ*] भवत्तदनुज × किल मङ्गल(ले)शः[।*] य-पूर्व्व-
पश्चिम-समुद्र-तटोषिताश्व-सेना-रज-पट-विनिर्म्मित-दिग्वितानः
[॥११*] स्फुरन्मयूखैरसि-दीपिका-शतैः(तैर्)

६. व्युदस्य मातङ्ग-तमिस्र-सञ्चयम् [।*]अवाप्तवान्योरण-रङ्ग-मन्दिरे
कटच्चुरि-श्री-ललना-परिग्रहम् ॥[१२*] पुनरपि च जिघृक्षोस्सै-
न्यमाक्रान्त-सालम् (लं) रुचिर-बहु-पताकं रेवती-द्वीपमाशु [।*]
सपदि महदुदन्वत्तोय-संक्रान्त-बिम्बम्(म्बं) वर(रु)ण-बलमिवा-
भूदागतं यस्य वाचा ॥[१३*] तस्याग्रजस्य तनये नहुषानुभागे(वे)
लक्ष्म्या किलाभि-

७. लषिते पुलिकेशि-नाम्नि [।*] सासूयमात्मनि भवन्तमत-
पितृव्यम्(व्यं)ज्ञात्वा [ऽ] परुद्ध-चरित-व्यवसाय बुद्धौ [॥१४*]
स यदुपचित-[म]न्त्रोत्साह-शक्ति-प्रयोग-क्षपित-बल-विशेषो
मङ्गलेशस्समन्तात् [।*] स्व-तनय-गत-राज्यारम्भ-यत्नेन सार्द्धं
निजमतनु च राज्यञ्जीवितञ्चोज्झति स्म ॥[१५*]तावत्तच्छत्र
(त्त्र)-भङ्गे जगदखिलमरात्यन्धकारोपरुद्धं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

८. यस्यासह्य-प्रताप-द्युति-ततिभिरिवाक्क्रान्तमासोत्प्रभातम् [।*] नृत्यद्विद्युत्पताकै॒प्रजविनि मरुति क्षुण्ण-पय्य(र्य्य)न्त-भागै-र्गर्ज्जद्भिर्व्वारि-वासै(है)रलि-कुल-मलिनं व्योम यातं कदा वा ॥ [१६*]ल[ब्ध्वा] कालं भुवमुपगते जेतुमाप्पायिकाख्ये गोविन्दे च द्विरद-निकरैरुत्तराम्भैमरथ्या: [।*] यस्यानीकैर्युधि भय-रस-ज्ञत्वमेक॒प्रयात-स्तत्रावाप्तम्फलमुपकृतस्या--

९. परेणापि सद्यः ।(।।)[१७*] वरदा तुङ्ग-तरङ्ग-रङ्ग-विलसद्धंसावली-मेखलां वनवासीमवमृद्नतस्सुर-पुर-प्रस्पर्द्ध (र्द्धि)नीं सम्पदा [।*] महता यस्य बलार्ण्णवेन परितस्सञ्छादितोर्व्वीतलं । स्थल-दुर्गञ्जल-दुर्गतामिव गतं तत्तत्क्षणे पश्यताम् [।।१८*] गङ्गालुपेन्द्रा व्यसनानि सप्त हित्वा पुरोपार्ज्जित-सम्पदो [ऽ]पि[।*]यस्यानुभावोपनतास्सदा [ऽऽ]सन्ना-

१०. सन्न-सेवामृत-पान-शौण्डाः [१९*] कोङ्कणेषु यदादिष्ट-चण्ड-दण्डाम्बु-वीचिभिः [।*] उदस्तास्तरसा मौर्य्य-पल्वलाम्बु-समृद्धयः । (।।) [२०*] अपर-जलधेर्ल्लक्ष्मी(क्ष्मीं) यस्मिन्पुरीम्पुरभित्प्रभे मदगज-घटाकारैर्न्नावं शतैरवमृद्नति [।*] जलद-पटलानीकाकि(की)र्ण्णन्नवोत्पल-मेचकञ्जलनिधिरिव व्योम व्योम्नस्स-

११. मो [ऽ]भवदम्बुभिः(धिः) [।।२१*] प्रतापोपनता यस्य लाट-मालव-गूर्ज्जराः । दण्डोपनत-सामन्त-चर्य्याच[ा]र्य्या इवाभवन् ।। [२२*] अपरिमित-विभूति-स्फीत-सामन्त-सेना- मुकुट-मणि-मयूखाक्क्रान्त-पादारविन्दः [।*] युधि पतित-गज(जे)न्द्रानीक-वी(बी)भत्स-भूतोभय-विगलित-हर्षो येन चाकारि हर्षः ।। [२३*] भुवमुरुभिरनीकैम्शा-

१२. सतो यस्य रेवो(वा)-विविध-पुलिन-शोभा[ऽ*] वन्ध्य-विन्ध्योपकण्ठ [: ।*] अधिकतरमराजत्स्वेन तेजो-महिम्ना शिखरिभिरिभ-वर्ज्या[र्ज्यो] व[र्ष्मं]णा स्पर्द्धयेव [।।२४*] विधिवदुपचिताभि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्शक्तिभिश्शक्र-कल्प-स्तिसृभिरपि गुणौघैस्स्वैश्च माहा-
कुलाद्यै [: ।*] अगमदधिपतित्वं यो महाराष्ट्रकाणां नव-नवति-
सहस्र-ग्राम-भाजां त्रयाणां [।।२५*] गृहिणां स्व-

१३. स्व-गुणैस्त्रि-वर्ग्ग-तुङ्गाविहितान्य-क्षितिपाल-मान-भङ्गा [: ।*]
अभवन्नुपजात-भीति-लिङ्गा यदनीकेन स-को[स*]ला×
कलिङ्गा [: ।।२६*] पिष्टं पिष्टपुरं येन जातं दुर्ग्गमदुर्ग्गम-
ञ्चित्रं यस्यकलेर्वृत्तम् [त्तं] जातं दुर्ग्गम-दुर्ग्गमम् । (।।) [२७*]
सन्नद्ध-वारण-घटा-स्थगितान्तरालम्(लं) नानायुध-क्षत-वर-
क्षतजाङ्ग-रागम् [।*] आसीज्जलं यदवमर्द्दितमभ्र-गर्भं कौनाळम-

१४. म्बरमिवोर्जि(र्ज्जि)त-सान्ध्य-रागम् ।। [२८*] उद्धूतामल-
चाव(म)र-ध्वज-शत-च्छत्रा(त्त्रा)न्धकारैर्व्व(र्ब्बे)लैः शौर्य्योत्साह-
रसोद्धतारि-मथनैर्म्मौल[ा*] दिभिष्षड्विधैः [।*] आक्क्रान्तात्म-
बलोन्नतिम्बल-रजस्सञ्छन्न-काञ्चीपुरः(र)-प्राकारन्तरित-
प्रतापमकरोद्य⁀पल्लवानां पतिम् ।। [२९*] कावेरी-दृत-
शफरी-विलोल-नेत्रा चोळानां सपदि जयोद्यतस्य यस्य [।*]
प्रश्च्योतन्मद-गज-से

१५. तु-रुद्ध-नीरा संस्पर्शं परिहरति स्म रत्न-राशेः । (।।) [३०*]
चोळ-केरळ-पाण्ड्यानाम्(नां) यो [ऽ*] भूत्तत्र महर्द्धये [।*]
पल्लवानीक-नीहार-तुहिनेतर-दीधितः ।। [३१*] उत्साह-प्रभु-
मन्त्र-शक्ति-सहिते यस्मिन्समस्ता दिशो जित्वा भूमि-पतीन्वि-
सृज्य महितानाराद्ध्य देव-द्विजान् [।*] वातापीन्नगरीं प्रविश्य
नगरीमेकामिवोर्व्वि(र्व्वी)मिमाम्(मां) चञ्चन्नीरधी(धि)-
नील-नीर-परिखां

१६. सत्याश्रये शासति ।। [३२*] त्रिंशत्सु त्रि-सहस्रेषु भारता-
दाहवादितः [।*] सप्ताब्द-शत-युक्तेषु श(ग)तेष्वब्देषु पञ्चसु
[३३*] पञ्चाशत्सु कळौ काले षट्सु पञ्च-शतासु च [।*]
समासु-समतीतासु शकानामपि भूभुजाम् ।। [३४*] तस्याम्बुधि-
त्रय-निवारित-शासनस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१७. सत्याश्रयस्य परमाप्तवता प्रसादं [।*] शैलञ्जिनेन्द्र-भवनम्भ-वनम्महिम्ना-न्निर्म्मापितम्मतिमता रविकीर्त्तिनेदम् ।। [३५*] प्रशस्तेर्व्वसतेश्चास्याः(स्या) जिनस्य त्रि-जगद्गुरो × कर्त्ता कारयिता चापि रविकीर्ति × कृती स्वयम् ।। [३६*] येनायोजि नवे[ऽ]श्म-स्थिरमर्त्थ-विधौ विवेकिना जिन-वेश्म [।*]स विजयतां रविकीर्त्ति × कविता-

१८. श्रित-कालिदास-भारवि-कीर्त्तिः । (।।) [३७*] मूलावळ्ळि-वेळ्मळति कवाडमच्चनूर्गङ्गवूर्पु ळिगेडे-गण्डवग्राम [।*] इति ग्रस्य भुक्ति [ः।*] गिरि(रे)स्तटा-त्पश्चिम[ा]भिगत-निमूवारिर्य्याव [त्*] महापथान्त-पुरस्य सि(सी)मा उत्तरतः दक्षिणतो

१९·········ग ·····न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महेन्द्रपाल का पेहवा अभिलेख

स्थान : हरयाणा के कुरुक्षेत्र जिले के पेहवा नगर में एक भवन की दीवार में लगे पुस्तर-खण्ड पर उत्कीर्ण ।

लिपि : नौवीं-दसवीं शताब्दी ईसवी की देवनागरी ।

भाषा : संस्कृत ।

विषय : तोमरवंशी राजा जज्जुक के गोग्ग, पूर्णराज तथा देवराज नामक तीन पुत्रों द्वारा विष्णु के तीन मन्दिरों का निर्माण । तोमर वंश की प्रशस्ति

संदर्भ : ब्यूलर, EI, I, p. 242.

१. ओं[1] नमो माधवाय ।। याते यामवती-पतौ शि[खरिषु क्षामे]षु सर्वात्मना ध्वस्ते ध्वान्त-रिपो जने विघटिते स्रस्ते च तारा-गणे । भ्रष्टे भू-वलये गतेषु च तथा रत्नाकरेष्वेकतामेको यस्स्वपिति प्र-

२. धान-पुरुष⏑⏑ पायात्स वः शार्ङ्ग भृत् ।।[१।।*] दृष्टि⏑⏑ [पायात्त्रिजग]दखिलं शार्ङ्गिण × कान्त-मूर्ते × कान्ता-सद्भ्रू-स्फुरित-सुभग-स्निग्ध-ताराभिरामा । उद्यत्तीव्र-स्मर-जलनिधौ मज्जतश्श्री-मुखेन्दु-स्फार-ज्योत्स्ना-[भव]-

३. ⏑ ⏑ [रुचः] स्मेर-गण्ड-स्थलस्य ।।[२।।*] क्षेत्रं कुरो[र्विविध-पाप-म]लाभिघात-दक्षं क्रियादुदयमस्त-समस्त-तापम् । श्रद्धया-

१. चिह्न मात्र ।

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सितं मुनि-गणैरुदितातम-वो(बो)घ-प्रद्ध्वस्त-गाढ-तिमिर-प्रकट-प्रमोदैः ।।[३।।*] पोत-

४. [स्संसार-सिं¹]धौ सुर-पथ-गमने स्यन्दनस्साधु-[वर्ग————]तवह्ने॒ प्रलय-जलधरस्सम्पतत्सान्द्र-धारः । नाना-व्याधि-प्रव[ब]न्ध-प्रचुरतरतम॒-पङ्क-बिद्ध्वंस-भानुर्नीरञ्चैतत्समन्ता-[द्*] द्यतु दुरित-

५. [गणं चारु] [सा]रस्वतं वः ।।[४।।*] यश्शक्तः स्व-कुल [मनुग्र-हीतु]¹मृद्धया भिन्दान॒ पर-व(ब)ल-मानसं समन्तात् । स श्श्रीमाञ्जयति महेन्द्रपालदेवः शान्तारिश्शशधर-सुन्दरः शरण्यः ।।[५।।*]आसीत्तोमर-तुङ्ग-वंश-ति-

६. [लकश्चण्ड-प्र]तापोज्व(ज्ज्व)लो राजा रंजित-साधु-वृत्त-[हृदयो दु]र्वृत्त-शैलाशनिः । नाम्ना जाउल इत्यपूर्व-चरित-ख्यातो दयालंकृतिस्तत्वा(त्त्वा)लोकि-विलोकित-क्षितिपति-व्यापार-लब्धोदयः ।।[६।।*] येन ज्ञाति-कुलं क-

७. [––⏑⏑––नी]तं परां संपदं छिन्नाराति-करीन्द्र-कुम्भ-शकलैः×कृत्वोपहारं भुवः । कीर्त्या(र्त्त्या) यस्य च नाक-नाग-निकर-व्यासङ्गतः सङ्गमाद्व्योम्नश्च स्फुरदिन्दु-सुन्दर-रुचा स्व-स्सिन्धुलीलायितम् ।।[७।।*] प्रतिदिश-

८. [ममरा]णां मन्दिराण्युच्छ्रिताग्र-स्थगित-शशधराणि स्फारमारो-पितानि । जगति वितत-भासा येन दूरं विभान्ति स्व-यश इव निरोद्धुं शङ्कवो दिङ्निखाताः ।।[८।।*] तत्संतान-महोदधे॒ प्रमुदित-प्रोद्यद्भुजङ्गाश्र-

९. याद्दुर्लङ्घ्याद्घन-मौक्तिकांशु-निकर-स्फारीभवत्सम्पदः । प्रख्याता-जनि यस्स्व-वङ्श-तिलकः श्री-वज्रटाख्य॒ प्रभु॒ प्राप्ताशेष-

---

१. ब्यूलर का अनुमान ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनोरथश्शुभतर-व्यापार-तुङ्गोन्नतिः ॥[९॥*] तस्य स्फुरदिन्दु-
रुचिः शौरेरिव जल-

१०. धि-कन्यका जाता [।] नाम्ना मङ्गलदेवी जाया गिरिजेव
गिरिशस्य ॥[१०॥*] तस्मात्तस्याञ्जज्जुक॒ प्रादुरासीदुच्चै-
श्शान्तस्सत्सु निर्मत्सरेषु । क्रूर × केतुर्द्दुर्द्धरारातिचक्रे क्रुद्ध-
चत्सेना-कुञ्जरद्ध्वान-रौद्रे ॥[११॥*] तस्य

११. स्फुरन्निशित-खड्ग-निकृत्त-शत्रोस्त्रस्तान्ध-दीन-निकरोद्धरणोरु-
कीर्तेः(र्त्तेः) । सद्वृत्त-रक्त-वनिता-तिलकाङ्क-कल्पे कान्ते व(ब)-
भूवतुरुदार-शशाङ्क-कान्ते ॥[१२॥*] एका चन्द्रेति विख्याता
द्वितीया नाइ(यि)केति च । विशि-

१२. ष्ट-गुण-निर्माणा[द्*] द्वे एव सदनं श्रियः ॥[१३॥*] चन्द्रायास्स-
मजनि गोग्गनामधेयो धीराणां धुरि विनिवेशितो विधात्रा ।
भूनाथो द्विषदिभ-कुम्भ-भेद-निर्यन्मुक्ताभि[र्महित-महीतल]
शिशतासिः ॥[१४*॥] अ[सू]त[च वि-]

१३. चक्षणं क्षत-विपक्ष-पक्ष-प्रभं प्रभाकर-करोत्करं स्व-व(ब)ल-
सैनिकाम्भोरुहाम् । अधर्म-परिपन्थिनं तदनु पूर्णराजं सुतं स्व-
वंश-गगनोदरे तुहिन-[दीधितिं नायि]का ॥[१५॥*] कर-त[ल[-
स्थगिताधर-पल्ल-

१४. वा॒ प्रतनु-कान्ति-कपोल-तलोदरम् । सिषिचुरस्रु (श्रू)-जलैर्य-
दरि-स्त्रियस्सरलित-प्रचुरालक-जालकाः ॥[१६॥*] तस्य भ्राता
गुण-निधिरभूत्सोदरो देवराजः स्फूर्जत्तेज॒-प्रवहित-पर-स्फार-
सेनान्धकारः । स्था-

१५. नं क्षान्तेः क्षत-कलि-मलः क्षिप्त-रागादि-दोषः स्निग्ध-च्छायस्तरु-
रिव ततस्सत्फलाम्म्र-मूर्तिः (र्त्तिः) ॥[१७॥*] नामापि प्रकटतरं
निशम्य यस्य क्रुद्धस्य भ्रुकुटि-तरङ्गितान्नस्य । दृप्तानां युधि
विकसद्विगाढ-भासां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१६. सस्रंसे करतलतः कृपण-दण्डः ।[।१८*।।] यदास्य-सरसीरुहं सरसमर्थिनां पश्यतान्नितान्तमगमत्क्षणात्क्षयमुपद्रवो मानसः । व्यघूर्णता च सम्भ्रमात्प्रतिभट-द्ध्वनद्दिन्तनां घटा-विघटनोन्मुखी

१७. समिति यस्य सद्यः पुरः ।।[१६।।*] इत्युद्दाम-प्रकटित-गुणोद्-गार-रम्या × क्रमेण प्राप्त-श्रीकाश्शुभतर-धियस्साधु-रक्तास्त्रयो [ऽ*]पि । विष्णोस्सौधान्यतुल-महस × कारयामासुरत्र त्रस्तास्ती [व्राद्भवजल]-निधेर्दु र्ग[मा]-

१८. न्मन्द-वो(बो,धैः ।।[२०।।*] गोग्गेन कारितं मध्ये पूर्णराजेन पृष्ठतः । पुरतो देवराजेन घनान्ध-तमसछि (श्छि)दे ।[।२१।।*] चतुस्समुद्र-सीमांकं यावदेतन्मही-तलम् । इदमायतनं तावद्विभातु सदनं श्रियः ।।[२२।।*] धन्वन्तरि-प्र-

१६. तिनिधिश्श्रुत-सार-मूर्ति (र्त्ति)स्सद्व(द्ब)न्धुरच्युत इति प्रकटाभि-धानः । काम्वो(म्बो)जज ⌣ प्रभु-मन × कमल-द्विरेफो रामस्य सूनुरिह कारयिता व(ब) भूव ।।[२३।।*] यक्षपालक-नामैको द्वितीयो गेज्जराभिधः । पाटला[ख्य]स्तृती[योऽपि ग्रा]-

२०. मो भोगाय कल्पितः ।।[२४।।*] अत्रार्थैः क्षमा नाथैः श्रेयो [ऽ*] र्थ देहस्य । संसारं दृष्टवोचैः(च्चैः) कर्तव्या सद्वु (द्बु)द्धिः ।।[२५*] स्व-कुल-गगन-भ[ानुः]—⌣—ार-प्रसक्तः श्रुत-विनय-विदग्धो भट(ट्ट)राम × किलासीत् । अकृत मधुर-[बन्धां मु]⌣⌣स्तस्य

२१. सूनुस्सरस-ललित सारां ल्ली(ली)लयेमां प्रशस्तिम् ।।[२६।।*] व(ब)भूव सुत्रधारो[ऽ*]त्र दुर्लभादित्य-संज्ञितः । × × × × ⌣— —⌣[बा?]ला-दित्येन धीमता ।।[२७।।*]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वीसलदेव का दिल्ली-टोपरा स्तम्भ अभिलेख

विक्रम संवत् १२२०

स्थान : दिल्ली के कोटला फीरोजशाह में स्थित अशोक के स्तम्भ पर उत्कीर्ण। यह स्तम्भ अपने मूल-स्थान टोपरा (हरियाणा) से फीरोजशाह तुग़लक द्वारा दिल्ली लाया गया था।

लिपि : तेरहवीं शताब्दी ईसवी की देवनागरी।

भाषा : संस्कृत।

विषय : शाकम्भरी चौहान नरेश वीसलदेव (विग्रहराजदेव) के वीर चरितों का उल्लेख।

संदर्भ : राधाकान्त शर्मा, AR, 1, pp. 379-82; एच. टी. कोलब्रुक, AR, 7, pp. 179-81; कैप्टन विल्फोर्ड, AR, 9, pp. 178-89; कीलहॉर्न, IA, 19, p. 215.

(भाग-क)

ॐ[1] [।।*] संवत् १२२० वैशाख-शुति[2] १५ [।।*]
शाकंभरी-भूपति-श्रीमदवेल्लदे-
वात्मज[3]-श्रीमद्वीसलदेवस्य ।।

१. ॐ[1] [।।*] अंभो नाम रितु-प्रिया-नयनयोः प्रत्यर्थि-दंतान्तरे प्रत्य-
क्षाणि तृणानि वैभव-मिलत्काष्ठं यशस्तावकं।

२. मार्ग्गो लोक-विरुद्ध एव विजनः शून्यं मनो विद्विषां श्रीमद्विग्रह-

---

१. चिह्न मात्र।
२. शुक्ल-तिथि का संक्षेप।
३. °ज के आगे विसर्ग उत्कीर्ण करके काट दिए गए हैं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राजदेव भवतः प्राप्ते प्रयाणोत्सवे ॥ [१*]

३. लीला-मंदिरसोदरेषु भवतु स्वांतेषु वाम-भ्रुवां शत्रूणां तु न विग्रह-क्षितिपते न्याय्यो[ऽ*]त्र वासस्तव ।

४. शंका वा पुरुषोत्तमस्य भवतो नास्त्येव वारां-निधेर्न्निर्म्मथ्यापहृत-श्रियः किमु भवान्क्रोडे न निद्रायितः ॥] २*]

(भाग-ख)

१. ॐ[१] ॥ आ विंध्यादा हिमाद्रेर्व्विरचित-विजयस्तीर्थ[२]-यात्रा-प्रसंगा-दुद्ग्रीवेषु प्रहर्त्ता नृपतिषु विनमत्कन्धरेषु प्रसन्नः ।

२. आर्यावर्त्तं यथार्थं पुनरपि कृतवान्म्लेच्छ-विच्छेदनाभिर्द्देवः शाकंभरीन्द्रो जगति विजयते वीसल-क्षोणिपालः ॥[३*]

३. ब्रू(ब्रू)ते संप्रति चाहमान-तिलकः शाकंभरी-भूपतिः श्रीमद्विग्रह-राज एष विजयी संतानजानात्मनः ।

४. अस्माभिः करदं व्यधापि हिमवद्विंध्यांतरालं भुवः शेष-स्वीकर-णाय मा [ऽ*]स्तु भवतामुद्योग-शून्यं मनः ॥[४*]

५. संवत् श्री-वि(वै)क्रमादित्ये १२२० वैशाख-शुति १५ गुरौ [॥*] लिखितमिदं राजादेशात्(ज्)ज्योतिषिक-श्री-तिलकराज-प्रत्यक्षं गौडान्वय-कायस्थ-माहव-पुत्र-श्रीपतिना ।

६. अत्र समये महामंत्री राजपुत्र-श्री-सल्लक्षणपालः ॥

---

१. चिह्न मात्र ।

२. 'विजय के आगे विसर्ग अनावश्यक ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिशिष्ट

प्रकीर्ण अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पिप्रावा अस्थि-कलश अभिलेख

स्थान : उत्तरप्रदेश में बस्ती जिले के पिप्रावा ग्राम के निकट एक स्तूप में से प्राप्त अस्थि-कलश पर उत्कीर्ण ।

लिपि : ब्राह्मी ।

विषत : भगवान बुद्ध के अवशेषों का प्रतिष्ठापन ।

संदर्भ : **ब्यूलर, तथा बार्थ**, JRAS, 1898, pp. 387 ff; **जी. दौम्मसन**, Jounral des Savants, oct. 1906, pp. 541 ff; **बार्थ**, IA, 36, pp. 117 ff; **फ्लीट**, JRAS, 1907, pp. 105 ff; **सरकार**, SI, p. 81.

१. इयं सलिल-निधने बुधस भगवते सकियनं[1] [।]
इदं शरीर-निधानं बुद्धस्य भगवतः शाक्यानां

२. सुकिति-भतिनं[2] स-भगिनिकनं स-पुतदलनं [।।]
सुकृति-भ्रातृणां स-भगिनीकिनां स-पुत्रदाराणाम्

१. 'यनं' पंक्ति के ऊपर उत्कीर्ण है । संभवतः पहले यह छूट गया था । सरकार ने 'यानं' पढ़ा है, परन्तु आ की मात्रा का सर्वथा अभाव है ।
२. सरकार ने 'सुकीर्ति-भक्तचोः' संस्कृत छाया दी है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वीरदेव का घोसरवा अभिलेख

स्थान : बिहार के पटना जिले के बिहार नगर से बारह किलोमीटर दक्षिण-पूव घोसरवा ग्राम ।

लिपि : उत्तरी ब्राह्मी ।

भाषा : संस्कृत ।

विषय : वीरदेव द्वारा वज्रासन (भगवान बुद्ध) के मन्दिर तथा दो चैत्यों का निर्माण ।

संदर्भ : कीलहॉर्न, IA, 17, p. 307.

१. ॐ श्रीमानसौ जयति सत्व (त्त्व)-हित-प्रवृत्त-सन्मानसाधिगत-तत्व(त्त्व)-नयो मुनीन्द्रः । क्लेशात्मनां दुरित-नक्र-दुरास-दान्तः-सन्सा (संसा) र-सागर-समुत्त-

२. रणैक-सेतुः ।। [१*] अस्यास्मद्गुरवो व(ब)भूवुरव (ब) लाः सम्भूय हर्त्तुं मनः का लज्जा यदि केवलो न व(ब)लवानस्मि त्रिलोक-प्रभौ ।

३. इत्यालोचयते-व मानस-भुवा यो दूरतो वर्जितःश्रीमान्विश्व-मशेषमेतदवताद्वो(द्बो)धौ स वज्रासनः ।।[२*]

४. अस्त्युत्तरापथ-विभूषण-भूत-भूमिर्देशोत्तमो न-गरहार इति प्रतीतः । तत्र द्विजातिरुदितोदित-वङ्श(वंश)-जन्मा नाम्नेन्द्रगुप्त इति राज-सखो व(ब)भूव ।।[३*]रज्ज(ज्जे)कया द्विज-वरः स गुणी गृ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५. ह्रिण्या युक्तो रराज कलया[ऽ*]मलया यथेन्दुः । लोकः पतिव्रत-कथा-परिभावनासु संकीर्त्तनं प्रथममेव करोति यस्याः ।।[४*] ताभ्यामजा-

६. यत सुतः सुतरां विवेकी यो वा(बा)ल एव कलितः परलोक-वु(बु)द्धया । सर्व्वोपभोग-सुभगे [ऽ*]पि गृहे विरक्तः [प्रव्र]ज्यया सुगत-शासनमभ्युपे(पै)-

७. तु (तुम्) ।।[५*] वेदानधीत्य सकलान् कृत-शास्त्र-चिन्तः श्रीमत्कनिष्कमुपगम्य महाविहारं(रम्) । आचार्य-वर्यमथ स प्रशम-प्रशस्यंसर्व्वज्ञशान्तिमुपगम्य

८. तपश्चचार ।।[६*]सो[ऽ*]यं विशुद्ध-गुण-सम्भृत-भूरि-कीर्त्तेः शिष्यो [ऽ*]नुरूप-गुण-शील-यशो-[ऽ*]भिरामः । वा(बा)लेन्दु-वत्कलि-कलङ्क-विमुक्त-कान्ति-र्वन्द्यः

९. सदा मुनि-जनैरपि वीरदेवः ।।[७*]वज्रासनं वन्दितुमेकदा[ऽ*]थ श्रीमान्महावो(बो)धिमुपागतो[ऽ*]सौ । द्रष्टुं त[तो] [ऽ*]गात्सहदे(शि)-भिक्षून् श्रीमद्यशोवर्म्म-

१०. पुरं विहारं ।।[८*] तिष्ठन्नथेह सुचिरं प्रतिपत्ति-सारः श्री-देवपाल-भुवनाधिप-लब्ध(ब्ध)-पूजः । प्राप्त-[illegible]: प्रतिदिनोदय-पूरिताशः पूषेव दारित-

११. तमःप्रसरो रराज ।। [९*] भिक्षोरात्म-समः सुहृद्भुज इव श्री-सत्यवो(बो)धेर्निजो नालन्दा-परिपालनाय नियतः सङ्घ-स्थितेर्यःस्थितः । येनैतौ स्फु-

१२. टमिन्द्रशैल-मुकुट-श्री-चैत्य-चूडामणी श्रामण्य-व्रत-सम्वृ(संवृ)तेन जगतः श्रेयोऽर्थमुत्थापितौ ।।[१०*] नालन्दया च परिपालितयेह सत्या श्रीम-

१३. द्विहार-परिहार-विभूषिताङ्गया । उद्भासितो [ऽ*]पि व(ब)हु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कीर्त्ति-वधू-पतित्वे यः साधु साधुरिति साधु-जनैः प्रशस्तः ॥[११*] चिन्ता-ज्वरं शमयिता[ऽ*]ऽर्त्त-जन-

१४. स्य दृष्टया धन्वन्तरेरपि हि येन हृतः प्रभावः। यश्चेप्सितार्थ-परिपूर्ण्ण-मनोरथेन लोकेन कल्पतरु-तुल्यतया गृहीतः ॥[१२*] तेनैतद-

१५. त्र कृतमात्म-मनोवदुच्चै-र्व्वज्रासनस्य भवनं भुवनोत्तमस्य। संजायते यदभिवीक्ष्य विमानगानां कैलास-मन्दर-महीधर-शृंङ्ग-शङ्का ॥[१३*] सर्व्व-

१६. स्वोपनयेन सत्व(त्त्व)-सुहृदामौदार्यमभ्यस्यता सम्वो(म्बो)धो विहित-स्पृहं सह गुणैर्व्विस्पर्द्धि वीर्यन्तथा। अत्रस्थेन निजे निजाविह ब्र्(वृ)हत्पुण्याधिकारे

१७. स्थिते येन स्वेन यशो-ध्वजेन घटितौ वङ्शा(वंशा)वुदीची-पथे ॥[१४*]सोपान-मार्गमिव मुक्ति[पुर]स्य कीर्त्तिमेताम्वि(तां-वि)धाय कुशलं यदुपात्तमस्मात्।

१८. कृत्वा[ऽऽ*]दितः स-पितरं गुरु-वर्गमस्य सम्वो(सम्बो)धिमेतु जन-राशिरशेष एव ॥[१५*] यावत्कूर्म्मो जलधि-वलयं भूत-धात्रीं वि(बि)भर्त्ति ध्वान्त-ध्वन्सी(ध्वंसी) तपति तपनो यावदेवोग्र-रश्मिः।

१९. स्निग्धालोकाः शिशिरमलसा यामवत्यश्च याव-त्तावत्कीर्त्तिर्जयतु भुवने वीरदेवस्य शुभ्रा ॥[१६*]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दन्तिदुर्ग का एलोरा ताम्र-पट्ट अभिलेख

शक संवत् ६६३

स्थान : महाराष्ट्र के औरंगाबाद जिले में एलोरा नामक प्रसिद्ध प्राचीन स्थल से प्राप्त दो ताम्र-पट्ट।

लिपि : उत्तरी ब्राह्मी।

भाषा : संस्कृत।

विषय : राष्ट्रकूट राजा दन्तिदुर्ग द्वारा नवसारिका मूल के कुछ ब्राह्मणों को चन्दनपुरी चौरासी के अन्तर्गत पिप्पलाल नामक ग्राम का दान।

संदर्भ : एस. के. दीक्षित, EI, 25, p. 25.

(प्रथम-पट्ट)

१. ॐ स्वास्ति[।*] बदरिकावासकात्समधिगत-पंच-महाशब्द-म-
२. हा-सामन्ताधिपति-राष्ट्रकूटान्वय-गोत्रालंकार-श्री-कक्कं-
३. राज[स्] तत्पादानुद्धचात-परम-माहेश्वर-समाधिगत-पंच-म
४. हाशब्द-महासामन्ताधिपति-श्रीमदिन्द्रराज-[स्तत्*]-सुत[ो*] मेरु-महीधर-
५. गिर (? विजर)-स्थिर-रुचिर-समुन्नते विकसित-यशसि महति स इन्द्रराज्ञा (राजस्या)-
६, न्वये अनेक-चातुर्द न्त-गज-घटाटोप-समर-संघट्ट-ल-
७, ब्ध-विजयी(यः) समधिरात-पञ्च-महाशब्द-महासामन्ताधिपति-
८. प्री(पृ)थिवी-वल्लभ-खड्गावला(लो)क-श्री-दन्तिदुर्ग-राजः कुशली
९. सर्वानेव राज-सामन्त-भोगिक-विषयपति-राष्ट्रकूट-महत्तरा-
१०. धिकारिकादी[न्*] समाज्ञापयत्यस्तु वो विदितं यथा च मया एल[ा*]पुर-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

११. व्यवस्थितेन अश्वयुज-शुद्ध-त्रयोदश्यां स्व-हस्तेन पादां(दौ) प्रक्षा-

१२. ल्य परलोकमपेक्षत्वमङ्गीकृत्य (लोकमपेक्ष्य) महत्फलं च श्रुत्वा चन्दनपुरि-

१३. चतुराशित्या(रशीत्य)न्तर्गत-पिप्पलालं नाम ग्राम[:*] नवसारि-

१४. का-विनिर्ग्गत-भरद्वा[ज]-सगोत्राय तथा[ऽ*]ध्वर्य्यु-रेवादित्य-

१५. भट्टाय तथा माउलाय तथा[गो]विसरेभ्य(भ्यो)गुहेश्वर-ती-

(द्वितीय-पट्ट)

१६. र्थ-स्नातेन बलि-चरु-वैश्वदेवाग्निहोत्रादिक्र(क्रि)यो-

१७. त्सर्प्पणार्त्थं माता-पित्रोरात्मनश्च पुण्य-यशो-[ऽ*]भि-

१८. ब्रि(वृ)द्धये पिप्पलाल-ग्राम[:*] प्रतिपादितः यत[:*] अ-चाट-भट-प्रवेश्य[:*] अ-

१९. भ्यन्तर-सिद्धिक[:*] सर्व्वादानं-संग्राह्य[:*] यतो [ऽ*]स्म[द्]-वंशै(श्यै)रन्यैर्व्वा भोग-नृ-

२०. पतिभिः (भावि-नृपति-भोगपतिभिः) नल-वेणु-कदळी-सार-संसार-जल-बुद्बुदोपमं जीवित-

२१. मवधार्य्य अस्मद्दायो[ऽ*]नुमन्तव्य[:*] प्रतिपालयितव्यश्च यो वा [ऽ*]ज्ञा-

२२. न-तिमिरान्धावृत-मतिराचि(च्छ)न्द्यादाछि(च्छ)द्यमानं वा[ऽ*] नुमोदेत स

२३. पंचभिर्महा-पातकै[:*] संयु[न*]क्त[।*] उक्तं च भगवतो(ता) वेदव्यासेन[।*] षष्टिं

२४. वर्ष-सहस्राणि स्वर्गिग(र्गे) तिष्ठति भूमिदः। आच्छेता(त्ता) चानुमन्ता च

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२५. तान्येव नरके वसे[त्*]। [। *] विन्ध्याटवीष्वतोयासु शुष्क-
कोटर-वासिन[:।*]

२६. क्रि(कृ)ष्णाहयो हि जायंते(यन्ते) भूमि-दायं हरन्ति ये [।।*]
बहुभिर्वसु-

२७. धा भुक्ता राजभि[:*] सगरादिभि: यस्य यस्य यदा भूमि[स्]
तस्य तस्य तदा फ-

२८. लं(लमं) [।।*] सं ६०० ६० ३ अश्वयुज-शुद्ध-त्रयोदश्यां
सोमवारे

२९. लिखितमिदं कुक्कुरेन(ण) गवंग [वाब्बा]भिहितेन [।।*]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विजयसेन का देवपारा अभिलेख

स्थान : बंगाल के राजशाही जिले में देवपारा।

लिपि : देवनागरी।

भाषा : संस्कृत।

विषय : सेन वंशी राजा विजयसेन द्वारा शिव-मन्दिर का निर्माण। शिव को यहां प्रद्युनेश्वर कहा गया है। प्रशस्ति में सेन वंश का वर्णन।

संदर्भ : कीलहॉर्न, EI, 1, p. 305.

१. ओं [।।*] ओं नमः शिवाय ।।

वक्षोंशुकाहरण-साध्वस-कृष्ट-मौलि-माल्य-च्छटाहत-रतालय-दीप-भासः । देव्यास्त्रपा-मुकुलितं सुखमिन्दु-भाभिर्व्वीक्ष्याननानि हसितानि जयन्ति शम्भोः ।।[१*] लक्ष्मी-वल्लभ-

२. शैलजा-दयितयोरद्वैत-लीला-गृहं प्रद्युम्नेश्वर-शव्द(ब्द)-लाञ्छ-नमधिष्ठानं नमस्कुर्म्महे। यत्रालिङ्गन-भङ्ग-कातरत[या] स्थित्वा-न्तरे कान्तयोर्द्देवीभ्यां कथमप्यभिन्न-तनुता-शिल्पेऽन्तरायःकृतः ।। [२*] यत्सिंहासनमीश्वर-

३. स्य कनक-प्रायं जटा-मण्डलं गङ्गा-शीकर-मञ्जरी-परिकरैर्य-च्चामर-प्रक्रिया। श्वेतोत्फुल्ल-फणाञ्चलः शिव-शिरः-सन्दान-दामोरगश्छत्त्रं यस्य जयत्यसावचरमो राजा सुधा-दीधितिः ।।[३*] वंशे तस्यामर-स्त्री-वि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४. तत-रत-कला-साक्षिणो दाक्षिणात्य-क्षौणीन्द्रैर्व्वीरसेन-प्रभृतिभिर-
भितः कीर्त्तिमद्भिर्व्व(र्ब्ब)भूवे । यच्चारित्रानुचिन्ता-परिचय-
शुचयः सूक्ति-माध्वीक-धाराः पाराशर्येण विश्व-श्रवण-परिसर-
प्रीणनाय प्रणीताः ॥ [४*]

५. तस्मिन् सेनान्ववाये प्रति-सुभट-शतोत्सादन-ब्र(ब्र)ह्मवादी
स ब्र(ब्र)ह्म-क्षत्त्रियाणामजनि कुल-शिरो-दाम सामन्तसेनः ।
उद्गीयन्ते यदीयाः स्खलदुदधि-जलोल्लोल-शीतेषु सेतोः
कच्छान्तेष्वप्सरोभिर्द्दशरथ-तनय-स्पर्द्धया युद्ध-गाथाः ॥ [५*]

६. यस्मिन् सङ्गर-चत्वरे पटु-रटत्तूर्योपहूत-द्विष-द्वर्गे येन कृपाण-
काल-भुजगः खेलायितः पाणिना । द्वैधीभूत-विपक्ष-कुञ्जर-घटा-
विश्लिष्ट-कुम्भ-स्थली-मुक्ता-स्थूल-वराटिका-परिकरैर्व्व्या-

७. प्तं तदद्याप्यभूत् ॥ [६*] गृहाद्गृहमुपागतं व्रजति पत्तनं पत्तना-
द्वनाद्वनमनुद्रुतं भ्रमति पादपं पादपात् । गिरेर्ग्गिरमधिश्रितन्तरति
तोयधिं तोयधेर्यदीयमरि-सुन्दरी-सरक-पृष्ठ-लग्नं यशः ॥ [७*]
दुर्व्वृत्तानामयमरि-

८. कुलाकीर्ण्ण-कर्ण्णाट-लक्ष्मी-लुण्टाकानां कदनमतनोत्तादृगेकाङ्ग-
वीरः । यस्मादद्याप्यविहत-वसा-मान्स-मेदः-सुभिक्षां हृष्यत्-
पौरस्त्यजति न दिशं दक्षिणां प्रे[त]-भर्त्ता ॥ [८*] उद्गन्धीन्याज्य-
धूमैर्म्मृग-शिशु-रसिताखिन्न-

९. वैखानस-स्त्री-स्तन्य-क्षीराणि कीर-प्रकर-परिचित-ब्र(ब्र)ह्म-
पारायणानि । येनासेव्यन्त शेषे वयसि भव-भयास्कन्दिभिर्म्म-
स्करीन्द्रैः पूर्ण्णोत्सङ्गानि-पुलिन-परिसरारण्य-पुण्याश्रमाणि
॥ [९*] अ-चरम-परमात्म-ज्ञान-भी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विजयसेन का देवपारा अभिलेख

स्थान : बंगाल के राजशाही जिले में देवपारा ।

लिपि : देवनागरी ।

भाषा : संस्कृत ।

विषय : सेन वंशी राजा विजयसेन द्वारा शिव-मन्दिर का निर्माण । शिव को यहां प्रद्युनेश्वर कहा गया है । प्रशस्ति में सेन वंश का वर्णन ।

संदर्भ : कीलहॉर्न, EI, 1, p. 305.

१. ओं [।।*] ओं नमः शिवाय ।।

वक्षोंशुकाहरण-साध्वस-कृष्ट-मौलि-माल्य-च्छटाहत-रतालय-दीप-भासः । देव्यास्त्रपा-मुकुलितं सुखमिन्दु-भाभिर्व्वीक्ष्याननानि हसितानि जयन्ति शम्भोः ।।[१*] लक्ष्मी-वल्लभ-

२. शैलजा-दयितयोरद्वैत-लीला-गृहं प्रद्युम्नेश्वर-शव्द(ब्द)-लाञ्छ-नमधिष्ठानं नमस्कुर्म्महे । यत्रालिङ्गन-भङ्ग-कातरत[या] स्थित्वा-न्तरे कान्तयोर्द्देवीभ्यां कथमप्यभिन्न-तनुता-शिल्पेऽन्तरायःकृतः ।। [२*] यत्सिंहासनमीश्वर-

३. स्य कनक-प्रायं जटा-मण्डलं गङ्गा-शीकर-मञ्जरी-परिकरैर्य-च्चामर-प्रक्रिया । श्वेतोत्फुल्ल-फणाञ्चलः शिव-शिरः-सन्दान-दामोरगश्छत्त्रं यस्य जयत्यसावचरमो राजा सुधा-दीधितिः ।।[३*] वंशे तस्यामर-स्त्री-वि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४. तत-रत-कला-साक्षिणो दाक्षिणात्य-क्षौणीन्द्रैर्व्वीरसेन-प्रभृतिभिर-
भितः कीर्त्तिमद्भिर्व्व(र्ब्ब)भूवे । यच्चारित्रानुचिन्ता-परिचय-
शुचयः सूक्ति-माध्वीक-धाराः पाराशर्येण विश्व-श्रवण-परिसर-
प्रीणनाय प्रणीताः ।। [४*]

५. तस्मिन् सेनान्ववाये प्रति-सुभट-शतोत्सादन-व्र(ब्र)ह्मवादी
स व्र(ब्र)ह्म-क्षत्त्रियाणामजनि कुल-शिरो-दाम सामन्तसेनः ।
उद्गीयन्ते यदीयाः स्खलदुदधि-जलोल्लोल-शीतेषु सेतोः
कच्छान्तेष्वप्सरोभिर्द्दशरथ-तनय-स्पर्द्धया युद्ध-गाथाः ।। [५*]

६. यस्मिन् सङ्गर-चत्वरे पटु-रटत्तूर्योपहूत-द्विष-द्वर्गे येन कृपाण-
काल-भुजगः खेलायितः पाणिना । द्वैधीभूत-विपक्ष-कुञ्जर-घटा-
विश्लिष्ट-कुम्भ-स्थली-मुक्ता-स्थूल-वराटिका-परिकरैर्व्व्यार्-

७. प्तं तदद्याप्यभूत् ।। [६*] गृहाद्गृहमुपागतं व्रजति पत्तनं पत्तना-
द्वनाद्वनमनुद्रुतं भ्रमति पादपं पादपात् । गिरेर्गिरमधिश्रितन्तरति
तोयधिं तोयधेर्यदीयमरि-सुन्दरी-सरक-पृष्ठ-लग्नं यशः ।। [७*]
दुर्व्वृत्तानामयमरि-

८. कुलाकीर्ण्ण-कर्ण्णाट-लक्ष्मी-लुण्टाकानां कदनमतनोत्तादृगेकाङ्ग-
वीरः । यस्मादद्याप्यविहत-वसा-मान्स-मेदः-सुभिक्षां हृष्यत्-
पौरस्त्यजति न दिशं दक्षिणां प्रे[त]-भर्त्ता ।। [८*] उद्गन्धीन्याज्य-
धूमैर्म्मृग-शिशु-रसिताखिन्न-

९. वैखानस-स्त्री-स्तन्य-क्षीराणि कीर-प्रकर-परिचित-व्र(ब्र)ह्म-
पारायणानि । येनासेव्यन्त शेषे वयसि भव-भयास्कन्दिभिर्म्म-
स्करीन्द्रैः पूर्ण्णोत्सङ्गानि-पुलिन-परिसरारण्य-पुण्याश्रमाणि
।। [९*] अ-चरम-परमात्म-ज्ञान-भी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१० ष्मादमुष्मान्निज-भुज-मद-मत्तारातिमाराङ्क-वीरः। अभवदन-वसानोद्भिन्न-निर्णिक्त-तत्तद्गुण-निवह-महिम्नां वेश्म हेमन्त-सेनः ।। [१०*]मूर्द्धन्यर्द्धेन्दु-चूडामणि-चरण-रजः सत्य-वाक्कण्ठ-भित्तौ शास्त्रं श्रोत्रे[ऽ*]रि-

११. केशाः पद-भुवि भुजयोः क्रूर-मौर्व्वी-किणाङ्कः । नेपथ्यं यस्य जज्ञे सततमियदिदं रत्न-पुष्पाणि हारास्ताडङ्कं नूपुर-स्रक्कनक-वलयमप्यस्य भृत्याङ्गनानाम् ।। [११*] यद्दोर्व्वल्लि-विलास-लब्ध(ब्ध)-गतिभिः शल्यैर्व्विदीर्ण्णोरसां

१२. वीराणां रण-[ती]र्थ-वैभव-वशाद्दिव्यं वपुर्व्वि(र्ब्बि)भ्रताम् । संसक्तामर-कामिनी-स्तन तटी-काश्मीर-पत्राङ्कितं वक्षः प्रागिव मुग्ध-सिद्ध-मिथुनैः सातङ्कमालोकितम् ।। [१२*] प्रत्यर्थि-व्यय-केलि-कर्म्मणि पुरः स्मेरं मुखं वि(बि)भ्रतोरे-

१३. तस्यैतदसेश्च कौशलमभूद्दाने द्वयोरद्भुतम् । शत्रोः को[ऽ*]पि दधे[ऽ*]वसादमपरः सख्युः प्रसादं व्यधादेको हारमुपाजहार सुहृदामन्यः प्रहारं द्विषाम् ।।]१३*] महाराज्ञी यस्य स्व-पर-निखिलान्तःपुर-वधू-

१४. शिरो-रत्न-श्रेणी-किरण-सरणि-स्मेर-चरणा । निधिः कान्तेः साध्वी-व्रत-वितत-नित्योज्ज्वल-यशा यशोदेवी नाम त्रिभुवन-मनोज्ञाकृतिरभूत् ।। [१४*] ततस्त्रि-जगदीश्वरात्समजनिष्ट देव्यास्ततो [ऽ*]प्यराति-व(ब)ल-शातनोज्ज्व-

१५. ल-कुमार-केलि-क्रमः । चतुर्ज्जलधि-मेखला-वलय-सीमा-विश्व-म्भरा- विशिष्ट-जय-सान्वयो विजयसेन-पृथ्वी-पतिः ।। [१५*] गणयतु गणशः को भूपतींस्ताननेन प्रति-दिन-रण-भाजा ये जिता वा हता वा । इह जगति विषे-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१६. हे स्वस्य वंशस्य पूर्व्वः पुरुष इति सुधांशौ केवलं राज-शब्द
(ब्द): ।। [१६*] संख्यातीत-कपीन्द्र-सैन्य-विभुना तस्यारि-
जेतुस्तुलां किं रामेण वदाम पाण्डव-चमू-नाथेन पार्थेन वा
हेतोः खड्ग-लतावतंसित-भुजा-मात्रस्य येनार्ज्जितं सप्ता-

१७. म्भोधि-तटी-पिनद्ध-वसुधा-चक्रैकराज्यं फलम् ।।[१७*] एकैकेन
गुणेन येन परिणतं तेषां विवेकादृते कश्चिद्धन्त्यपरश्च रक्षति
सृजत्यन्यश्च कृत्स्नं जगत् । देवो[ऽ*]यं तु गुणैः कृतोव(ब)हु-
तिथैर्द्धीमान् जघान द्विषो वृत्त-स्थान पुषच्चकार च

१८. रिपूच्छेदेन दिव्याः प्रजाः ।।[१८*] दत्त्वा दिव्य-भुवः प्रति-
क्षितिभृतामुर्व्वीमुरीकुर्व्वता वीरासृग्लिपि-लाञ्छितोऽसिरमुना
प्रागेव पत्त्रीकृतः । नेत्थं चेत् कथमन्यथा वसुमती भोगे
विवादोन्मुखी तत्राकृष्ट-कृपाण-धारिणि गता भ-

१९. ङ्गं द्विषां सन्ततिः ।।[१९*] त्वं नान्य-वीर-विजयीति गिरः
कवीनां श्रुत्वाऽन्यथा-मनन-रूढ-निगूढ-रोषः । गौडेन्द्र-भद्रवदपा-
कृत-कामरूप-भूपं कलिङ्गमपि यस्तरसा जिगाय ।।[२०*]
शूरंमन्य इवासि नान्य किमिह स्वं राघव श्लाघसे स्प-

२०. र्द्धां वर्द्धन मुञ्च वीर विरतो नाद्यापि दर्प्पस्तव । इत्यन्यो-
न्यमहर्न्निश-प्रणयिभिः कोलाहलैः क्ष्मा-भुजां यत्-कारागृह-
यामकैर्न्नियमितो निद्रापनोद-क्लमः ।।[२१*] पाश्चात्य-चक्र-
जय-केलिषु यस्य यावद्गङ्गा-प्रवाहमनुधावति

२१. नौ-विताने । भर्गस्य मौलि-सरिदम्भसि भस्म-पङ्क-लग्नोज्झितेव
तरिरिन्दु-कला चकास्ति ।। [२२*] मुक्ताः कर्प्पास-वी(बी)-
जैर्म्मरकत-शकलं शाक-पत्त्रैरलावू(बू)-पुष्पै रूप्याणि रत्नं
परिणति-भिदुरैः कुक्षिभिर्द्दाडिमानाम् । कुष्माण्डी-वल्लरीणां वि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२२. कसित-कुसुमैः काञ्चनं नागरीभिः [२३*] शिक्ष्यन्ते यत्-प्रसादाद्ब(द्ब)हु-विभव-जुषां योषितः श्रोत्रियाणाम् ।। [२४*] अश्रान्त-विश्राणित-यज्ञ-यूप-स्तम्भावलीं द्रागवलम्व(म्ब)मानः । यस्यानुभावाद्भुवि सञ्चचार काल-क्रमादेक-पदो[ऽ*]पि धर्म्मः ।।[२४*] मेरोरा-

२३. हत-वैरि-सङ्कुल-तटादाहूय यज्वा[ऽ*]मरान् व्यत्यासं पुर-वासिनामकृत यः स्वर्गस्य मर्त्त्यस्य च । उत्तुङ्गैः सुर-सद्मभिश्च विततैस्तल्लैश्च शेषीकृतं चक्रे येन परस्परस्य च समं द्यावा-पृथिव्योर्व्वपुः ।।[२५*] दिक्शाखा-मूल-काण्डं गगन-तल-म-

२४. हाम्भोधि-मध्यान्तरीयं भानोः प्राक्प्रत्यगद्रि-स्थिति-मिलदुदयास्तस्य मध्याह्न-शैलम् । आलम्व(म्ब)-स्तम्भमेकं त्रिभुवन-भवनस्यैक-शेषं गिरीणां स प्रद्युम्नेश्वरस्य व्यधित वसुमती-वासवः सौधमुच्चैः ।।[२६*] प्रासादेन तवामुनैव हरितामध्वा

२५. निरुद्धो मुधा भानो[ऽ*]द्यापि कृतो[ऽ*]स्ति दक्षिण-दिशः कोणान्तवासी मुनिः । अन्यामुच्छ-पथो [ऽ*]यमृच्छतु दिशं विन्ध्यो [ऽ*]प्यसौ वर्द्धतां यावच्छक्ति तथा[ऽ*]पि नास्य पदवीं सौधस्य गाहिष्यते ।।[२७*]स्रष्टा यदि स्रक्ष्यति भूमि-चक्रे सुमेरु-मृत्-पिण्ड-विवर्त्तनाभिः ।

२६. तदा घटः स्यादुपमानमस्मिन् सुवर्ण्ण-कुम्भस्य तदर्घितस्य ।।[२८*]वि(बि)लेशय - विलासिनी-मुकुट-कोटि-रत्नाङ्कुर-स्फुरत्-किरण-मञ्जरी-च्छुरित-वारि-पूरं पुरः । चखान पुर-वैरिणः स जल-मग्न-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२७. पौराङ्गना-स्तनैण-मद-सौरभोच्चलित-चञ्चरीकं सरः ।।[२९*] उच्चित्राणि दिगम्व(म्ब)रस्य वसनान्यर्द्धाङ्गना-स्वामिनो रत्नालंकृतिभिर्व्विशेषित-वपुः-शोभाः शतं सुभ्रुवः । पौराढ्याश्च पुरीः श्मशान-वसतेर्भिक्षा-भु-

२८. जो[ऽ*]स्याक्षयां लक्ष्मीं सव्यतनोद्दरिद्र-भरणे सुज्ञो हि सेनान्वयः ।। [३०*]चित्र-क्षौमेभ-चर्म्मा हृदय-विनिहित-स्थूल-हारोरगेन्द्रः श्रीखण्ड-क्षोद-भस्मा कर-मिलित-महा-नील-रत्नाक्षमालः । वेषस्तेनास्य तेने गरुड़-मणि-लता-गोन-

२९. सः कान्त-मुक्ता-नेपथ्य-न्त्रस्थिरिच्छा-समुचित-रचनः कल्प-कापालिकस्य ।।[३१*]वा(बा)होः केलिभिरद्वितीय-कनक-च्छत्त्रं धरित्री-तलं कुर्व्वाणेन न पर्यशेषि किमपि स्वैनेव तेनेहितम् । किन्तस्मै दिशतु प्रसन्न-वरदो [ऽ*]प्यर्द्धेन्दु-मौलिः

३०. परं स्वं सायुज्यमसावपश्चिम-दशा-शेषे पुनर्द्दास्यति ।।[३२*] प्रस्तोतुमस्य परितश्चरितं क्षमः स्यात् प्राचेतसो यदि पराशर-नन्दनो वा । तत्-कीर्त्ति-पूर-सुरसिन्धु-विगाहनेन वाचः पवित्र-यितुमत्र तु नः प्रयत्नः ।। [३३*] यावद्वास्तोस्पति-

३१. पूर-धुनी भुर्भुवः-स्वः पुनीते यावच्चान्द्री कलयति कलोत्तंसतां भूत-भत्तु(र्त्तुः) । यावच्चेतो गमयति सतां श्वेतिमानं त्रि-वेदो तावत्तासां रचयतु सखी तत्तदेवास्य कीर्त्तिः ।। [३४*] निर्णिक्त-सेन-कुल-भूपति-मौक्तिकानामग्रन्थिल-ग्र-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३२. थन-पक्ष्मल-सूत्र-वल्लिः । एषा कवेः पद-पदार्थ-विचार-शुद्ध-
वु(बु)द्धेरुमापतिधरस्य कृतिः प्रशस्तिः ॥ [३५*]
धर्म्म-प्रणप्ता मनदास-नप्ता वृ(बृ)हस्पतेः सूनुरिमां
प्रशस्त्तिं [*।] चखान वारेन्द्रक-शिल्पि-गोष्ठी-चूडामणी राणक
शूलपाणिः ॥ [३६*]

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुद्धि-पत्र

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१	१०	प्राचलित	प्रचलित
४	६	विजित	विजिते
१२	३	वढीते से लेकर नोट १ को छोड़कर शेष पृष्ठ १२ तथा पृष्ठ १३ को पृष्ठ ६ के अन्त में पढ़ें।	
१७	५	समयं	सयमं
१८	६	शयाय	अयाय
२५	५	सर्वपाषडान्	सर्वपाषण्डान्
२५	११	मञते	मन्यते
२६	३	उसघातो	उपघातो
३०	७	थमं	धमं
३१	१३	अर्थस्थ	अर्थस्य
३२	३	रोपरा	टोपरा
३७	४	कल्याणगमेव	कल्याणमेव
३७	१४	°यिष्पामि	°यिष्यामि
४५	४	चवम्	एवम्
८२	७	14	140
१००	१७	षरीवाह	परीवाह
१०१	१८	मेदे	भेदे
१०२	५	करुण्येन	कारुण्येन
१७३	१२	°प्रतमां	°प्रतिमां
१८२	१३	कुलपगीत	कुलोपगीत
१८४	११	°दौत्रहस्यि	°दौहित्रस्य
१८४	१३	°सृहीतो	°गृहीतो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१९७	१	°गणयमाना	°गणयमान
२०८	३	तटा	तटो
२२०	१०	शत	शते
२३४	१	श्रादेशात्स्फीत-शील-श्रु त-धवल-धि पाठ पंक्ति के श्रन्त में जोड़ें।	
२३४	१४	पर—	पार—
२४२	२	(ध)	(धू)
२४२	१५	श्लाघवता°	श्लाघावता°
२४३	७	श्रीम°	श्रीमा°
२५७	६	-हृदया-	-हृदय-
२५७	८	शरणगत°	शरणागत°
२५८	४	(य)	(त्य)
२६६	१०	°रात्मश्च	°रात्मनश्च
२७३	७	-भाक-	-भार-
२७५	८	शतेपु	शतेषु
२७६	१३	°श्वक्रचधर	°श्चचक्रधर
२७८	१३	मूत्त	मूर्त्तं
२७९	५	पंक्ति के श्रारम्भ में जोड़ें—श्रीशार्दूलनृपः।	
२८७	१७	-व्वयस्थापन-	-व्यवस्थापन-
२९९	१०	-रिपो	-रिपौ
३०२	१	कृपण-	कृपाण-
३०२	१३	-द्वरेफो	-द्विरेफो
३०४	१३	व्यधापि	व्यधायि
३१३	७	(लमं)	(लम्)
३१५	१९	धूमैम्मृग-	धूमैर्म्मृग-
३१८	२	श्रोत्रियाणास्	श्रोत्रियाणाम्
३१९	१७	पूर-	पुर-

—०—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गिरनार शिला अभिलेख १-२

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गिरनार शिला अभिलेख ३-४

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh



दिल्ली-टोपरा स्तम्भ अभिलेख १-३

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh



समुद्रगुप्त का इलाहाबाद स्तम्भ अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh



कुमारगुप्त (प्रथम)-कालीन उदयगिरि गुहा अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh



कुमारगुप्त (प्रथम)-कालीन उदयगिरि गुहा अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh



स्कन्दगुप्त-कालीन कहाऊँ स्तम्भ अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh



यशोधर्मन्-कालीन मन्दसौर अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh



अनन्तवर्मन् का बराबर गुहा अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनन्तवर्मन् का नागार्जुनी (उत्तरी) गुहा अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh



अनन्तवर्मन् का नागार्जुनी (दक्षिणी) गुहा अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh



महानामन् का बोध-गया अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh



धरसेन (द्वितीय) का मालिया ताम्र-पट्ट (१) अभिलेख

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh